नं० ५१-२८

मध्वकौमुदी
समासाश्रयविधिः
23 पत्राणी
व्याकरणम्
(समासप्रकरणम्)

मध्वकौमुदी समासः श्लो ३०८ प.२३

नं ५१



तत्कृतेति लुप्त तृतीयाकम् । लुप्ततृतीयाकमिति । सो गत्वा द्वितिशेषः । एवं च तत्कृ तेन तृतीयान्त परामर्शः तृतीयान्तार्थ गतद्वन्द्वात् लभ्यते तस्य च गुणवचने नेत्य नेनान्वयः गुणवचनस्य च तत्कृतत्व मर्थद्वारा तथा च तृतीयान्तार्थकृतो यो गुणस्तद्वाचकेन सह समस्यते इत्याशयेन व्याचष्टे

ॐ श्रीगणेशाय नमः ॥ अथ तत्पुरुषः ॥ तत्पुरुषः २।१।२२ अधिकारोऽयं प्राग्बहुव्रीहेः ॥ तृतीयान्ताधिकृत गुणवचनेनेति ॥ =४

द्विगुश्च २।१।२३ द्विगुरपि तत्पुरुषसंज्ञः स्यात् ॥ द्वितीया श्रितातीतपतितगतात्यस्त

प्राप्तापन्नैः २।१।२४ ॥ द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते ॥ कृष्णं श्रि

तः कृष्णश्रितः दुःखातीतः इत्यादि ॥ तृतीया तत्कृतार्थेन गुणवचनेन २।१।३०

तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनार्थेन च सह वा समस्यते ॥ शङ्कुलया ख

ण्डः शङ्कुलाखण्डः ॥ धान्येनार्थो धान्यार्थः । तत्कृतेति किम् । अक्ष्णा काणः ॥

कर्तृकरणे कृता बहुलम् ॥ २।१।३२ कर्तरि करणे च तृतीया कृदन्तेन बहुलं समस्यते ॥

हरिणा त्रातः । हरित्रातः । नखैर्भिन्नः । नखभिन्नः ॥ चतुर्थी तदर्थार्थबलि

हितसुखरक्षितैः ॥ २।१।३६ चतुर्थ्यन्तार्थाय यत्तद्वाचिना सह अर्थादिभिश्च

दुःखमतीतः । दुःखातीतः ।= शोकाद्धरणमिति । कूपं पतितः कूपपतितः । ग्रामं गतः । ग्रामगतः ॥ तुहिनमत्यस्तः । तुहिनात्यस्तः । सुखं प्राप्तः । सुखप्राप्तः । दुःखमापन्नः । दुःखापन्नः । =४

अत्यल्पमुद्देशेन ... द्वितीयापदं द्वितीयान्तपदमित्यर्थः ... द्वितीयान्तमिति । श्रितादि ... तदन्तविधिलाभात् ... इति ॥

अक्ष्णेति । न त्वक्ष्णा काणत्वं कृतं किन्तु कर्मादिनेवेति न तत्कृतं काणत्वमत्र येनाङ्गविकार इत्यनेन तृतीया ।

भक्ष्येण मिश्रीकरणम् २।१।३५ गुडेन मिश्रा धानाः । गुडधानाः ।

खरं विशदमभ्यवहार्य्यं भक्ष्यमित्युक्तेः कठिनं द्रविकावयवं खाद्यं यत्तद्वस्तु तद्वाचिना मिश्रीकरणवाचि तृतीयान्तं समस्यते इति सूत्रार्थः मिश्रणद्वारैव तयोः सामर्थ्यम् ॥

बलिरक्षितग्रहणाद्धिति। हितसुखग्रहणं तु न ज्ञापकं तद्योगे चतुर्थ्या अप्राप्त्यानेन चतुर्थी विधानात् ताभ्यां तादर्थ्ये चतुर्थ्या असमासार्थ इति बोध्यम् ॥

बलिरक्षितग्रहणं तु ज्ञापकात्।

वे=२

अर्थशब्दस्य नित्यत्वमुक्त्वा परवल्लिङ्गनित्यस्य बाधायाह विशेष्यलिङ्गतावेति एतदेवाग्र विधेयं न तु नित्यत्वं चतुर्थ्यैव तदर्थस्योक्तत्वात्तदप्रयोगेणार्थशब्देन विग्रहप्रसक्तेः ॥=

तुर्थ्यंतं वा समस्यते ॥ यूपाय दारु यूपदारु ॥ तदर्थेन प्रकृति विकृति विकार भाव एवेष्यते ॥ तेनेह न । रंधनाय स्थाली । अर्थेन नित्यसमासो विशेष्यलिंगता चेति वक्तव्यम् ॥ द्विजायायं द्विजार्थः सूपः । द्विजायइयं द्विजार्था यवागूः । द्विजायइदं द्विजार्थं पयः । भूताय बलिः भूतबलिः । गवे हितं गोहितं । गोसुखं । गोरक्षितं ॥ पञ्चमी भयेन ।२।१।३७। पंचम्यंतं भयेन वा समस्यते ॥ चोराद्भयम् । चोरभयम् ॥ स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन ।२।१।३९। स्तोकादयः क्तान्तेन सह समस्यते ॥ पंचम्याः स्तोकादिभ्यः ६।३।२ एभ्यः पंचम्या अलुक् स्यादुत्तरपदे परतः ॥ स्तोकान्मुक्तः । अल्पान्मुक्तः । अंतिकादागतः । अभ्याशादागतः । दूरादागतः । कृच्छ्रादागतः ॥ षष्ठी २।२।८ षष्ठ्यंतं सुबंते

सह=

स्तोकेति। अत्र स्तोकार्थोऽल्पशब्द एव न तु लेशादयो व्याख्यानात् ॥

खंडवाच्यर्द्धशब्दो न नित्यनपुंसकः ग्रामार्द्धो नगरार्द्ध इति षष्ठ्यासे समांश
वाचीतु नित्यनपुंसकः स एवेह गृह्यते पूर्वापरे ति सूत्र एवार्द्ध शब्दे पठनी
ये अर्द्ध मिति योगविभाग निर्देशान्न पुंसकत्वे लब्धे पुनर्नपुंसक ग्रहण
दित्याशयेनाह नित्यं क्लीव इति ॥ =५

पिप्पल्या नियतविभक्तिकत्वे ऽनेकविभक्तित्वात् पूर्वनिपात इत्य
नेनोपसर्जनत्वात् ह्रस्वत्वप्राप्त्याह एकविभक्तावितिः । =

राजपुरुष इति । राजन् अस् पुरुष सु इत्य
लौकिक विग्रहे समासे कृते सुपो लुक्य
न्तर्वर्तिनी विभक्तिमाश्रित्य पदान्तत्वा
न्नलोपः । =

षष्ठी समास प्रसंगात् तदपवादमेकदेशिसमास
माह । पूर्वापरे ति । एकदेशोऽवयवे रूढः स एतो
मत्वर्थीय इनिः अवयवित्वस्यावयवाकांक्षा
या मुपस्थितत्वात् पूर्वादय एवावयवा इति
बोध्यम् ॥ =१

न सह समस्यते ॥ राज्ञः पुरुषः । राजपुरुषः ॥ पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे ॥२।२।१॥ अवयविना सह पूर्वादयः समस्यन्ते ॥ एकत्वसंख्याविशिष्टश्चेदवयवी ॥ षष्ठीसमासापवादः । पूर्वं कायस्य पूर्वकायः । अपरकायः । एकदेशिना किं । पूर्वं नाभेः कायस्य । एकाधिकरणे किं । पूर्वं छात्राणां ॥ अर्द्धं नपुंसकं ॥२।२।२। समांशवाच्यर्द्धशब्दो नित्यं क्लीवे स प्राग्वत् ॥ अर्द्धं पिप्पल्याः । अर्द्धपिप्पली ॥ कालाः परिमाणिना ॥२।२।५॥ परिच्छेद्यवाचिना सुबन्तेन सह कालाः समस्यन्ते ॥ मासो जातस्य यस्य स मासजातः ॥ सप्तमी शौण्डैः ॥२।१।४०॥ सप्तम्यन्तं शौण्डादिभिः प्राग्वत् वा ॥ अक्षेषु शौण्डः । अक्षशौण्डः । शौण्ड । धूर्त । कितव । व्याड ।

कौ. २

यद्यपि अन्याराद् इति सूत्रे दिशिदृष्ट इति व्याख्यानेन अदिग्वृत्तिनापि योगे पञ्चमी स्वीकृता इति षष्ठी ह दुर्लभा तथापि तस्या परमास्त्रि त मिति लिंगादवयवाच्चियोगे पंचमीन । =३

एकविभक्तावषष्ठ्यन्तवचनं । इत्युपसर्जनसंज्ञाभावात् ह्रस्वो न । इति मूलं ॥ =६

इदञ्च सूत्रं जातस्य मास इति विग्रहे जातमास इत्यनिष्टप्रयोगनिवारणार्थं बहुव्रीहिणा गतार्थता तु न शंक्या मासो जातोऽस्येत्यादितो मासस्यैव जननप्रतीतेर्नेत्यन्यपदार्थस्य ॥

अधिकरणं द्रव्यमेकत्वविशिष्ट द्रव्ये वर्तमानेनावयवाविनेति वाक्यार्थः फलितमाह एकत्वेति । =२

पूर्वं नाभेः कायस्येति नाभेर्यः पूर्वभागः स कायस्यावयव इत्यर्थ स्तेन नाभेरवयवित्वाभावात् पूर्वशब्दयोगे षष्ठी तथा चात्र पूर्वस्य भागस्य नाभिरवधिर्न त्वेकदेशीति नानया न समास इति भावः । =४

सप्तमीति अधिकरणकारकस्य कर्तृकर्म द्वारा क्रियान्वया शौण्डादिभिः सामर्थ्यम् क्रियाचात्र सक्तिरन्यावेत्यत्र नाग्रहः । =२

कालाइति । बहुवचनात् कालवाचकाग्रहणं । परिमाणीत्यस्य परिच्छेद्यं तदाह परिच्छेद्य ... कालाः परिमाणिना समस्यन्ते । कालस्तु परिच्छेदकः ... ते परिच्छिद्यते येन तत्परि ... तदाह परिच्छेद्यवाचिनेति ... स्यन्ते न तु परिमाणी काले ... दकत्वं क्रियाद्वारेव मासजातो ... जननं ... कालान्तराल भावी मासादि जीता ... पुरुष मध्यपरिच्छिन्न ... इति तेन द्यहादिजातेन मासजातः ... द्विवर्षः ... व्यवहारः ॥ =३

प्रवीण। संवीत। अन्तराधिपति। पटु। पंडित। कुशल। चपल। निपुण
नि। द्वितीयातृतीया इत्यादियोगविभागादन्यत्रापि द्वितीयादीनां प्र
योगवशात्समासो ज्ञेयः॥ दिक्संख्ये संज्ञायाम्। २।१।५०। विशे
षणं विशेष्येण बहुलमित्येव सिद्धे संज्ञायामेवेति नियमार्थं सूत्रं॥
पूर्वेषुकामशमी। सप्तर्षयः। तेनेह न। उत्तरा वृक्षाः। पंच ब्राह्मणाः॥
तद्धितार्थोत्तरपदसमाहारे च। २।१।५१। तद्धितार्थविषये उत्तरपदे च
परतः समाहारे च वाच्ये दिक्संख्ये वा समस्येते॥ पूर्वस्यां शालायां भ
वः। पूर्वा शाला इति समासे जाते। सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। इति
पूर्वं पुंवद्भावः॥ दिक्पूर्वपदादसंज्ञायां ञः। ४।२।१०७। अस्माद्भवाद्य
र्थे ञः स्यादसंज्ञायां॥ तद्धितेष्वचामादेः। ७।२।११७॥ ञिति णिति च त

तद्धितार्थोत्तरे त्यादि सूत्रे वैषयिके।
आधारे सप्तमी। विषयत्वं चानेक
विधमित्याहुः। तद्धितार्थविषये इ
त्यादि तद्धितार्थवाच्ये इति तु नोक्तं
पाञ्चनापितिरित्यादौ समासेनोक्त
त्वात्तदुत्तरं तद्धितानुत्पत्तिप्रसंगात्
। अत एव द्विगोस्तद्धितस्य लुग्वच
नं चरितार्थमन्यथा तदर्थस्य समा
सेनोक्ततया प्रयोगात् तदनुत्प
त्तौ कथं लोपः स्यात्॥ =

नियमार्थमिति विशेषणं विशेष्ये
णेत्यनेन सिद्धे तत्पुरुषे संज्ञायामेव
दिक्संख्ये समस्येते नान्यत्रेति निया
मकमिदमिति भावः। लोकनाथ
इत्यादौ तु उत्तरपदद्विगुरिति असंत
त्वेऽपि न क्षतिः। पूर्वसूत्रमित्या
दौ संज्ञाभावेऽपि कालवाचकत्वात्
समासो न त्वयं दिग्विशेषबोध
उदयगिर्यादिसम्बन्धेनैव दिक्
त्वात् एवं देशवाचकेनापि समास
इति द्रष्टव्यम्॥ =४

यद्यपि स्त्रियाः पुंवदित्यनेनापि प्रकृतरूपसिद्धिस्तथापि उत्तरपूर्वा इत्या
द्यर्थं सर्वनाम्न इति वचनमावश्यकं वृत्तिपदेन कृत्तद्धितादिग्रहणेऽपि तद्वत्यन्यासो
न्याय्य इति भावः। तद्धितवृत्तौ समासवृत्तौ चेति कैयटः॥ =३

उदात्त इति अन्तर्बर्तितत्वावान्तरतत्
पुरुषे पूर्वपदे प्रकृतिस्वरेण पूर्वशब्द
स्याद्युदात्तत्वमेव स्यादिति भावः ॥ =३

तद्धितार्थेत्यत्रोक्त इति अयं भावः । पूर्वसूत्रविषये एवेयं संज्ञा एतदर्थमेव सूत्रद्वयं कृतमन्यथा दिक्
संख्ये संज्ञायामतद्धितार्थोत्तरपदसमाहारे चेति स्त्रियेव ब्रूयात् । तेन सप्तर्षय इत्यत्र इगन्तकपाले
त्यादिना पूर्वपदप्रकृतिस्वरत्वं न भवति किन्तु समासोऽन्तोदात्तत्वम् । एवञ्च संख्यापूर्वं त्रिवि
धः तद्धितार्थविषये उत्तरपदे च परतः समाहारे वाच्ये चेति तत्र संख्यापूर्वोऽयं समासः स
इत्यर्थः तद्धितार्थे यथा पञ्चकपालः संस्कृतं भक्ता इत्यणः द्विगोर्लुगनपत्ये इति लुक्
। उत्तरपदे यथा पंचनावप्रियः नावो द्विगोरिति समासान्तष्टच् । समाहारे पंच
मूली द्विगोरिति ङीप् ॥ =१०

कौ.
२
3

द्धिते पञ्चामादेरचोऽद्धिः स्यात् ॥ यस्येति च ॥ पोवशालः । पूर्वाशाला प्रिया
यस्येति त्रिपदे बहुव्रीहौ कृते प्रियाशब्दे उत्तरपदे पूर्वया तत्पुरुषः । तेन शा
लाशब्दे आकार उदात्तः ॥ पूर्वशालाप्रियः । किन्तु समाहारो नास्ति । अनभि
धानात् । संख्यायास्तद्धितार्थे । पञ्चानां मातॄणामपत्यं पाञ्चमातुरः ॥
मातुरुत्संख्यासंभद्रपूर्वायाः ॥४।१।११५॥ संख्यादिपूर्वस्य मातृशब्दस्य उदा
देशः स्यात् अण्प्रत्ययश्च । इति वक्ष्यमाणसूत्रेणाऽण् ॥ पंचगावो धनं य
स्येति त्रिपदे बहुव्रीहौ अवांतरतत्पुरुषस्य विकल्पे प्राप्ते ॥ द्वंद्वतत्पुरुषयो
रुत्तरपदे नित्यसमासवचनम् ॥ गोरतद्धितलुकि ॥५।४।९२॥ गोंता
त तत्पुरुषाट्टच् स्यात् । समासांतो न तु तद्धितलुकि ॥ पंचगवधनः ॥
संख्यापूर्वो द्विगुः ॥२।१।५२॥ तद्धितार्थेत्यत्रोक्तस्त्रिविधः संख्यापूर्वो द्वि

एतच्चोभयत्रापि नित्यताबोधक
मिति बोध्यम् । अत एवैतद्वार्त्तिक
मुक्त्वा समुदायवृत्तावयवानां क
दाचिदप्यवृत्तिर्मा भूदिति प्रयो
जनमुक्तं भाष्ये ॥ =८

विकल्पप्राप्ते इति मत्वा
विभावयेति शेषः । तत्रश्च
टजभावे पञ्चगोधन इ
त्यपि स्यादिति भावः ॥ =६

गोऽन्तस्य तत्पुरुषस्य समासस्यान्तष्टच् स्या
दिति सूत्रार्थस्तत्फलितमाह । गोऽन्तादिति ।
अतद्धितलुकीति किं पञ्चभिर्गोभिः क्रीतः पञ्च
गुरित्यत्र तद्धितठकोऽध्यर्द्धपूर्वेति लुक्यभा
भूत् ॥ =२

शिव.
२

द्विगुरेकवचनमिति। वक्ष्यतीति वचनं बाहुलकात् कर्त्तरि ल्युट् सामान्येन नपुंसकं द्विगुसमासः एकार्थवृत्तिपादको भवतीत्यर्थः। नहि वस्तुतो नैकार्थी स्येकार्थ्यं संभवतीत्यतोऽतिदेशोऽयमित्याशयेनाह। एकवदिति। तत्र यथा च समाहारे यो द्विगुस्तदर्थ एकवत् स्यादित्यर्थः। स नपुंसकमिति परत्वा लिंगमित्यस्यापवादः ॥=१

द्विगुरेकवचनं ॥२।४।१॥ द्विग्वर्थः समाहारे एकवचनं स्यात् ॥ स नपुंसकम् २।४।१७॥ समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् ॥ पञ्चानां गवां समाहारः। पंचगवं ॥ विशेषणं विशेष्येण बहुलं ॥२।१।५७॥ भेदकं भेद्येन समानाधिकरणेन बहुलं प्राग्वत् ॥ नीलमुत्पलं। नीलोत्पलं। बहुलग्रहणात् क्वचिन्नित्यं। कृष्णसर्पः। क्वचिन्न। रामो जामदग्न्यः ॥ अपरस्यार्द्धे पश्चाभावो वक्तव्यः ॥ अपरश्चासावर्द्धश्च। पश्चार्द्धः ॥ सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ॥२।१।६१॥ सह समस्यते ॥ सद्वैद्यः ॥ आन्महतः समानाधिकरणजातीययोः ॥६।३।४६॥ महावैयाकरणः। महांश्चासौ प्रकारो महाजातीयः ॥ तत्पुरुषः समानाधिकरणः कर्मधारयः ॥१।२।४२॥

विशेषणमिति। विशिष्यते येन तद्विशेषणं। कर्तुः करणत्व विवक्षायां ल्युट्। तदाह भेदकमिति व्यावर्त्तकमित्यर्थः। विशेषणविशेष्ययोः संबंधिकैकतया अन्यतरोपादानमात्रेणैव तदेतत् संभवे उभयोपादानं स्पष्टार्थमिति कैयटः ॥=३

समानाधिकरणजातीययोः परतः महच्छब्दस्य आकारोऽन्तादेशः स्यादित्=२

एतच्च पश्चादि सूत्रे भाष्ये स्थितम्=५

। सन्महत्। गुणक्रियाशब्दैः सदादीनां समासे पूर्वनिपात नियमार्थमिदं सूत्रम्। महापापमित्यादौ पापस्य महत्त्वेन संज्ञा पूजात्वेऽवेतिबोध्यम्=६

तत्पुरुषाधिकारे पुनस्तत्पुरुषग्रहणमेकसंज्ञाधिकारात् कर्मधारयसंज्ञया तत्पुरुषसंज्ञाया की बाधः स्यात् समाभूदित्येतदर्थमन्यथा तत्पुरुषे विहितसमासान्तस्य कर्मधारये प्रवृत्तिर्न स्यादिति बोध्यम्। समानाधिकरणः समानाधिकरणपदपूर्वक इत्यर्थो व्याख्यानात् ॥=९

उपमानानीति। उपमीयते येन तदुपमानं उपपूर्वात् माङः करणे ल्युट्। उपपूर्वकस्य माङः सादृश्यहेतुके परिच्छेदे रूढः। येन वस्तुना सादृश्येन वस्त्वन्तरं परिच्छिद्यते तदुपमानमित्यर्थः। समानो धर्मः सा
मान्यं चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्। उपमानोपमेयसाधारणो धर्मः सामान्यं तद्विशिष्टवच
नेत्यर्थः। न तु केवलं साधारणधर्मवचनैरिति। एतच्च वचनपदाल्लभ्यते पूर्वेण सामान्य
मुक्ता तद्वति द्रव्ये पर्यवस्यन्तीति यथा भवन्ति इति बोध्यम्॥ =१

लाक्षणिकमिति। अत एव सामानाधिकरण्यात् मृगीव चपलेति वा क्वचि
मृग चपलेति पुंवद्भावः उत्तरपदोपस्थापित श्यामत्व चपलत्वादि धर्म
रकमेव सादृश्यं गम्यते व्याख्यानात्। लाक्षणिकत्वेपि मूर्तपूर्वग
त्योश्चकार्यो बोधकत्वादुपमानपरतेत्यवसेयम्॥ =२

को॰उ॰
४

ॐ उपमानानि सामान्यवचनैः २।१।५५ घन इव श्यामः॥ घनश्यामः॥ इह पूर्वप
दं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते॥
पूर्वनिपातनियमार्थं सूत्रं॥ वि॥ शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्यो
पसंख्यानम्॥ वा॥ शाकप्रियः पार्थिवः॥ शाकपार्थिवः॥ देवपूजको
ब्राह्मणः। देवब्राह्मणः॥ मयूरव्यंसकादयश्च २।१।७२ एते निपात्यन्ते॥
मयूरो व्यंसकः। मयूरव्यंसकः॥ व्यंसको धूर्तः। उदक् च अवाक् च उच्चावचं।
निश्चितं च प्रचितं च निश्चप्रचं। नास्ति किंचन यस्य सः अकिंचनः॥
नञ् २।२।६ सुपा सह प्राग्वत्॥ नलोपो नञः ६।३।७३ नञो नस्य लोपः स्या
त् उत्तरपदे परतः॥ अब्राह्मणः॥ तस्मान्नुडचि ६।३।७४ लुप्त

पूर्वनिपातेति। अन्यथा खञ्जकुब्ज
वद् नियमः स्यादिति भावः॥ =३

मयूर इव व्यंसक इत्युपमान समासा
पवादोयं चकारोऽवधारणार्थः तेना
न्येन सह न समासान्तरं वारयति
ततश्च परमो मयूरव्यंसक इति वा
क्यमेव न समासः॥ मयूरव्यंसक
छात्रव्यंसक कम्बोजमुण्ड यवन
मुण्ड छन्दसि हस्तगृह्य पादगृह्य
लाङ्गूलगृह्य पुनर्दीय॥ =५

पृथिव्या ईश्वरः पार्थिवस्तस्येश्वर
इत्यण् शाकप्रिय इति बहुव्रीहि
स्तस्य पार्थिवशब्देन समासे पूर्वस
मासीयोत्तरपदस्य प्रियशब्दस्य
लोप एवं सर्वत्र शाकादिशब्दस्य
शाकप्रियादिलक्षणया तत्प्रयोगसम
र्थनेऽपि मुख्यार्थे शाकप्रियपार्थिव
इति इति प्रयोगनिरत्यर्थं सूत्रम्॥ =४

नञ् इह नलोपो नञ इति श्रीवल्लार्थी
नकारस्तत्फलं च नैकधेत्यत्र लोपः
अव्ययेनञ्कनिपातानामित्यव्यय
पूर्वपदप्रकृतिस्वरार्थं नकारोच्चारणमित्यन्ये। सुपा समस्यते
इति उत्तरपदार्थप्रधानोयं समासः तथाहि आरोपितत्वं नञो
द्योत्यते तथा च अब्राह्मणशब्दात् आरोपितो ब्राह्मण इति बोधे अ
र्थात् ब्राह्मणभिन्न इति पर्यवस्यति॥ =२॥

बो॰=
उत्तरपदे किं घटो नास्ति =

शि॰व॰
४

नतु पृथिवीवाचकः =२

नशब्देनेति नञा समासः । समासस्तु अनेकधेति स्यादिति भावः । एवमेव नमेरु नारायणनालंरियकादयः साधवः । =२

कुगतीति सूत्रे कुशब्दः कुत्सितार्थोऽव्ययमेव गृह्यते गत्यादिसाहचर्यात् । तेनाव्यय पूर्वपदं प्रकृतिस्वरः ॥ =२ ॥

नकारान्नञ उत्तरपदस्याजादेर्नुट् ॥ अनश्वः । नैकधेत्यादौ तु नशब्देन सह सुप्सुपेति समासः ॥ कुगतिप्रादयः २।२।१८ एते समर्थेन नित्यं समस्यन्ते ॥ कुत्सितः पुरुषः । कुपुरुषः ॥ ऊर्यादिच्विडाचश्च ॥ १।४।६१ ऊर्यादयश्च्व्यन्ताः डाजन्ताश्च क्रियायोगे गतिसंज्ञाः स्युः ॥ ऊरीकृत्य । ऊररीकृत्य । शुक्लीकृत्य । पटपटाकृत्य ॥ सुपुरुषः ॥ प्रादयो गताद्यर्थे प्रथमया । (वा०) । प्रगतः आचार्यः । प्राचार्यः । अत्यादयः क्रान्ताद्यर्थे द्वितीयया । (वा०) । अतिक्रान्तो मालामिति विग्रहे । एकविभक्ति चापूर्वनिपाते २।२।४४ । विग्रहे यन्नियतविभक्तिकं तदुपसर्जनं न तु तस्य पूर्वनिपातः ॥ गोस्त्रियोरुपसर्जनस्य १।२।४८ उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः ॥

समर्थेनेति परिभाषयोपस्थितं समर्थपदं तृतीयया विपरिणम्यते इति भावः ॥

ऊरी ऊररी इत्येता बङ्गीकारे =५

प्रादय इति । प्रादिशब्दैः उभयत्र प्रकारे तेन दुराचारः पुरुषो दुःपुरुष इत्यादि सिद्धम् । प्रगत आचार्य इति अनेन गतार्थे वर्त्तिं असपद विग्रहेण नित्यसमासतां च दर्शयति एवं प्रगतः पितामहः प्रपितामहः प्रमातामह इत्यादि ॥ =६

च्विडाचौ कृभ्वस्तियोगे गतिसंज्ञौ ऊर्यादयोऽपि शब्दस्वाभाव्यात्तत्रैव प्रयुज्यन्ते प्रायेण सजातीयाः सहचरा भवन्तीति न्यायेनैषां तथा साहचर्याद्वा मात्र तत्रापि आदि शब्दैः दुःशब्दो विहायान्येषां करोति नैव योग इति व्यवस्था । मनो० ॥ =३

अत्यादय इति । आदिपदादभिमुखं गतो मुखमभिमुखः । उत्क्रान्तो वेलामुद्वेलः । प्रतिगतोऽक्षं प्रत्यक्ष इत्यादि सिद्धम् ॥ =७

विग्रह इति । अनुवर्त्यमानेन समासे पदेन विग्रहो लक्ष्यते इति भावः । ननु तस्येति अनन्तरोक्तः पूर्वनिपातोऽनेन न निषिध्यते किन्तु ह्रस्वार्थमिदं सूत्रमिति भावः । निष्कौशाम्बिः निष्क्रान्तेत्यादिक्रमेण निष्क्रान्तादिशब्दस्यानियतविभक्तिकत्वेऽपि कौशाम्बीशब्दस्य नियतविभक्तिकतयोपसर्जनत्वात् । निष्कौशाम्बिरित्यत्र ह्रस्व इति बोध्यम् ॥ =३

अवादय इति आदिपदात् परिम्लानो वीरुधा परिवीरुत्। संनद्धो वर्म्मणा संवर्म्मेत्यादि ग्राह्यम्॥
पर्यादय इति आदिपदादुद्युक्तः संग्रामाय उत्संग्रामः। अध्ययनायेति तादर्थ्ये चतुर्थी गुरुकुलवासादिना परिग्लानोऽध्ययनार्थमित्यर्थः। निरादय इति आदिपदात् उत्क्रान्तः कूलादुत्कूलः निर्गतमङ्गुलिभ्यो निरङ्गुलमित्यादि ग्राह्यम्॥=

तत्तत्सूत्रे प्रथमार्थे सप्तमीबलेन लब्धमर्थमाह तद्वाचकं पदमिति॥=

कौ॰ ५

स्यात। अतिमालः॥ अवादयः क्रुष्टाद्यर्थे तृतीयया। अवक्रुष्टः कोकिलया॥ अवकोकिलः॥ पर्यादयो ग्लानाद्यर्थे चतुर्थ्या।॥ परिग्लानोऽध्ययनाय। पर्यध्ययनः॥ निरादयः क्रांताद्यर्थे पञ्चम्या।॥ निष्क्रान्तः कौशांब्याः। निष्कौशांबिः॥ तत्रोपपदं सप्तमीस्थं। ३।१।९२ सप्तम्यंते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुंभादि तद्वाचकं पदमुपपदसंज्ञं स्यात॥ उपपदमतिङ्। २।२।१९ उपपदं सुबंतं समर्थेन नित्यं समस्यते अतिङंतश्चायं समासः॥ कुंभं करोतीति। कुंभकारः। अतिङ् किं। मा भवान् भूत। माङि लुङिति सप्तमीनिर्देशान्माङुपपदं॥ अतिङ्ग्रहणं ज्ञापयति। सुपेत्येतदिहाऽनुवर्तत इति पूर्वसूत्रेऽपि गतिग्रहणं पृथक्कृत्वा तिङ्ग्रहणं। तत्रापकृष्यते। सुप

समर्थेनेति तेनेह महान्तं कुम्भं करोतीत्यादौ नातिप्रसङ्गः। अतिङन्तश्चेति सुपिति तु अनुवर्तत एवेति भावः। कुम्भ अस्कृति। अमिति तु नोक्तं कृद्योगे षष्ठीविधानात्॥=

तत्रोपपदमित्यधिकारः। तथा च। कर्म्मण्यणित्यादौ सप्तमी प्रथमार्थे सूत्रत्वात्॥ धातोरण् भवति कर्म्मण्युपपदसंज्ञे भवतीत्येवं रीत्या तत्तत्सूत्रार्थः। अत्र सूत्रे सप्तमीपदं तदन्तपरं तत्स्थं तद्वाच्यमित्याह। सप्तम्यंते पदे इति॥=

इह कुम्भ अस्कार इत्यलौकिकप्रक्रियावाक्यम्।

अलौकिकमित्यस्य समासप्रवृत्तियोग्यं लोके प्रयोगानर्हमित्यर्थः॥=

सुप्सुपेत्यधिकारात् तिङन्तेन समासो न भविष्यति कृतमतिङ्ग्रहणेनेत्याशङ्क्याऽतिङ्ग्रहणस्य ज्ञापकतयैव सार्थक्यं दर्शयति अतिङ्ग्रहणमिति॥= २

पूर्वसूत्रेऽपीति तथा च तत्रयोगं विभज्य कुगतिप्रादयः सुबन्ताः सुबन्तेन सह समस्यन्ते गतिश्च सुबन्तोऽतिङन्तेन समस्यत इति व्याख्येयमित्यर्थः॥= २

शिव ५

तथा चेति। यद्यपि युक्त क्रीत्यागतुपपदयोरेव लाभ स्तथापि गतयविषयिणी
प्राचां परिभाषा एकदेशानुमितन्यायेन इहापि ज्ञाप्यते इतिभावः॥
कारकांशे तु कर्तृकरणे कृतेति सूत्रस्थ बहुलग्रहणमुक्तार्थसाधकमित्य
पि मनोरमायां स्थितं। प्राग्भिति कृदंतात्स्वरमपदात् सुबुत्पत्तेः पूर्वं समास
इत्यर्थः। प्रथमान्तेसुबन्तहणेपि न तु वेईत एव तेनराजर = क्रीत्यादौ ईपदेन लो

पादिकार्येपि स्यादिति॥=

कारकमुदाहरति। अश्वक्रीतीति। अश्वेन क्रीयते स्मेति वाक्ये कर्तृ
करणे कृतेति तृतीयासमासः। ततोऽत्र पदे सुबुत्पत्तेः प्रागेव
समासे क्रीतात्करणपूर्वादिति ङीष्। सुबन्तेन समासे तु टापाभा
व्यमिति क्रीताद्यदस्यादन्तत्वाभावात्। क्रीतादित्यादिना ङीष्
न स्यादित्युक्तम्। प्राक्॥=२॥

तिवनिरुक्तं तथा च गतिकारकोपपदानां कृद्भिः सह समासवचनं
प्राक् सुबुत्पत्तेः। व्याघ्री। अश्वक्रीती। कच्छपीत्यादि॥ तत्पुरुषस्यां
गुलेः संख्याव्ययादेः ५।४।८६ संख्याव्ययादेरंगुल्यंतस्य तत्पुरुषस्य समासांतोऽ
च् स्यात्। द्वे अंगुली प्रमाणमस्य द्व्यंगुलं॥ निर्गतमंगुलिभ्यो निरंगुलं॥ अ
हः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः ५।४।८७ एभ्यो रात्रेरच् स्यात् चकारात्
संख्याव्ययादेः। अहर्ग्रहणं द्वन्द्वार्थम्॥ रात्राह्नाहाः पुंसि २।४।२९ ए
तदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव॥ अहश्च रात्रिश्च अहोरात्रः। सर्वरात्रः। पूर्व
रात्रः। पुण्यरात्रः॥ संख्यातरात्रः॥ संख्यापूर्वं रात्रं क्लीवम्॥ द्विरात्रं। अति
रात्रः। त्रिरात्रं॥ राजाहःसखिभ्यष्टच् ५।४।९१ एतदन्तात्तत्पुरुषाट्टच्।
परमराजः। कृष्णसखः॥ आन्महतः समानाधिकरणजातीययोः। मह
राजः॥ प्रकारवचने जातीयर् ५।३।६९ महाप्रकारो महाजातीयः॥

उपपदसमुदाहरति। कच्छपीति। क
च्छेन जलप्राय पिवतीति कच्छपी
सुपि स्थ इति योगविभागात् कः। इहा
पि व्याघ्रीवत् सुबुत्पत्तेः पूर्वं समा
सः। अत एव वहरिणा सुपांसुपा
तिङा नाम्ना धात्वादिना नाम्नैव स
मासो दर्शित इति स्मर्तव्यम्॥=२

तत्पुरुषप्रसंगात् तत्पुरुषासाधारणसमा
सान्तानाह। तत्पुरुषस्येति। तत्पुरुषाद्दु
ल इति वक्ष्यमाणे समासान्तापेक्षया ऽवयवे
षष्ठी निर्दिष्टे इति बोध्यम्॥=२

द्व्यंगुलमिति। तद्धितार्थे इति समासः द्विगो
र्नित्यमिति मात्रचो लोप इति वृत्तिकृत
मनोरमायां तु द्वयसचो लुगिति स्थितम्॥=४

अहोग्रहण इति। जातिरप्राणिनामित्येकवद्भा
वः स नपुंसकमिति स तद्बाधित्वा परत्वा
द्रात्राह्नाहा इति पुंस्त्वम्॥=७

सर्वा रात्रिः सर्वरात्र इति। पूर्वकालैकसर्व
जरत्पुराणनवकेवलाः समानाधिकर
णेन २।१।४९ इति समासः।=७

परिभाषाफलं दर्शयन् गतिमुदाहरति। व्याघ्रीति। व्याजिघ्रतीति व्याघ्री
आतश्चोपसर्गे॥ इति कः पाघ्राध्माधेट्दृशः इति घ्रादेशस्तु संज्ञायां नभ
वति व्याघ्रादिभिरिति निर्देशादिति वक्ष्यते व्याङ्पूर्वो घ्रशब्दे
न गतिसमासः यदि घ्रशब्दस्य सुबन्तेन नाम्ना समासो भवेत् तर्हि
सुबुत्पत्तेः संख्यायतेन ततश्च लिंगाद्युपेक्षायां टापो भा
व्यम् न तु ङीषो घ्रशब्दमात्रस्य जातिवाचित्वाभावात्।
ततश्च घ्रेति नाममात्रे सैव समासे ऽदन्तत्वात् जातिलक्षणो
ङीषिति स्थितम्॥=२

पूर्वं रात्रेः पूर्वरात्रः इति। पूर्वा
पराधरोत्तरमित्येकदेशिना संख्या
समासः॥=४ समासः=४=४

रात्रिमतिक्रांतः इत्यतिरात्रः=

द्वन्द्वार्थमिति। अन्हो रात्रिरिति षष्ठीतत्पुरुषस्या
सम्भवादिति भावः। अहः पदस्य प्रकृते परतया
रात्रिपदस्य पूर्वं तथा च प्रकृतले न्हो
ऽवयवी भूतत्वानुपरात्रिरिष्टं तत्त्व
र्थके ऽवयवतत्पुरुषस्याप्यानभिधानात् अन्य तत्पुरुषस्या सम्भवात् अहश्चाहो रात्रिश्चेति अहोरात्रः रात्रेश्च कृन्दइ
इति सूत्रे द्वन्द्वविषये एवेस मासान्तदर्शनात् द्वन्द्वविषयमिदमित्यर्थः॥=५

द्वयो रात्र्योः समाहारः
द्विरात्रम्। अतिक्रा
न्तो रात्रिम्। अतिरात्रः।=४

परवल्लिंगं सू० ॥ इतरेतरयोगे द्वंद्वो गृह्यते न समाहारे द्वन्द्वः स नपुंसकमित्यपवादस्यावश्यमारम्भणात् सूत्रे तत्पुरुषयोरिति न सप्तमी द्विवचनं तथा च द्वन्द्वे तत्पुरुषे च यत्परपदं तद्वल्लिंगं पूर्वपदस्येति इत्युक्ते न परपदस्य संबन्धिशब्दत्वेन पूर्वपदापेक्षकत्वात् ततः मयूरीकुक्कुटावित्यत्र पूर्वपदे ईकारनिवृत्तिप्रसंगः । कुक्कुटमयूर्यौ अर्द्धपिप्पलीत्यादौ तु पूर्वपदे स्त्रीप्रत्ययः उत्पद्येत किन्तु षष्ठीद्विवचनमित्याशयेनाह । परपदस्येवेति ॥ =३

द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ६।३।४७ आत्स्यात् ॥ द्वौ च दश च द्वादश द्व्यधिका दशेति वा । द्वाविंशतिः । अष्टाविंशतिः । अबहुव्रीह्यशीत्योः किं । द्वित्राः । द्व्यशीतिः ॥ परवल्लिंगं द्वन्द्वतत्पुरुषयोः २।४।२६ एतयोः परपदस्येव लिंगं स्यात् ॥ कुक्कुटमयूर्याविमे मयूरीकुक्कुटाविमौ अर्द्धपिप्पली ॥ द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः ॥ पंचकपालः पुरोडाशः । प्राप्तो जीविकां प्राप्तजीविकः आपन्नजीविकः अलंकुमार्यै अलंकुमारिः ॥ अत एव ज्ञापकात्समासः ॥ निष्कौशाम्बिः ॥ अर्द्धर्चाः पुंसि च २।४।३१ अर्द्धर्चादयः पुंसि क्लीबे च स्युः ॥ अर्द्धर्चः अर्द्धर्चं ॥ एवं ध्वजतीर्थशरीरमण्डपयूपदेहांकुशकलशसूत्रपात्रादयः ॥ सामान्ये नपुंसकं । मृदु पचति । प्रातः कमनीयं ॥६॥ इति तत्पुरुषः समासः । शुभम् ॥

कौ० टि०
६

6

गतिसमासपदं गतेः समासो येनेति बहुव्रीहिणा गतिसमासविधायकस्य प्रपरं तत्र कुगतिप्रादयः इति सूत्रम् । तस्मिंश्च कुगत्योरुदाहरणसंभवात् प्रादावुदाहरति निष्कौशाम्बिरिति । =५

मृदु पचतीति क्रियाविशेषणत्वात् द्वितीयांतम् । धातूपात्तभावनाप्रतिहि कलांशकर्मीभूतं तथा च फलसमानाधिकरणे द्वितीया अत एव स्तोकं पचतीत्यादौ कारकपूर्वकत्वाग्रहणम् =१

पर्यायस्येवेति । [illegible] षष्ठी यस्येव [illegible] इह राजसभा । चन्द्रगुप्तसभा । वचनस्येवेत्यर्थः । [illegible] काशिकास्वरूपस्य [illegible] ॥ =

त्वेस्मिन्क्लेशेति । परं तु पर्युदासनञाऽपि तत्सदृशमिति । तत्सादृश्यमभावश्च । तदन्यत्वं तदल्पता अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिता । इत्युक्तेः सादृश्यविशेषसहितभेदस्य प्रकृते नञर्थत्वस्वीकारेण राक्षसपिशाचानां च तथात्वादमनुष्यशब्देन तेषामेव ग्रहणमन्यथा काष्ठसभमित्यपि स्यादित्याहुः ॥ =

सभाशब्दस्य शालासंघातार्थकत्वेन तदर्थप्रवृत्तौ निषेधाभावेन नगरमश्वशालेति पर्युदासः । शालार्थभिन्नेत्यर्थः ॥ =

पंचसु कपालेषु संस्कृतः =

अर्द्धर्चा इति बहुवचनं गणसूचनार्थं तदाह अर्द्धर्चादय इति =४

सामान्ये नपुंसकमिति अनियतलिंगविषयकमिदं तेनादिव चति प्रातरादिरिति पुंस्त्वेव =२

सभा राजाऽमनुष्यपूर्वा २।४।२३ राजपर्यायपूर्वः अमनुष्यपूर्वश्च सभान्तस्तत्पुरुषो नपुंसकं स्यात् । इनसभं । ईश्वरसभं । अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाह । रक्षःसभं । पिशाचसभं ॥ विभाषा सेनासुराच्छायाशालानिशानां २।४।२५ एतदंतस्तत्पुरुषः क्लीबं वा । ब्राह्मणसेनं । ब्राह्मणसेना इत्यादि ॥ अशाला च २।४।२४ ॥ संघातार्था या सभा तदन्तस्तत्पुरुषः क्लीबं स्यात् ॥ स्त्रीसभं । स्त्रीसंघात इत्यर्थः । अशाला किं धर्मसभा धर्मशालेत्यर्थः ॥ = गु० ४ पंक्ति ॥ इत्यादीनि ॥ यवसुरं । यवसुरा । कुड्यच्छायम् । कुड्यच्छाया । गोशालं । गोशाला ।

शिवं

द्वितीया श्रितेत्यादिनायस्य त्रिकस्य
विशिष्य समासो नोक्तः स शेषः प्रथ
मान्त इत्यर्थः ॥=

अनेकमिति । द्वन्द्वैकशेषयोरपि प्रथमान्तपद
प्रवृत्तितया ततो विशेषार्थमाह । अनेकमित्या
दि प्रोप इति समर्थसुविति चानुवर्त्तते अनेकं
समर्थं परस्परं आकांक्षेशेषवद प्रतिपाद्यं प्रथमांतं सुबन्तमन्यस्य पदस्यार्थे वर्त्तमानं सत्
बहुव्रीहिरित्यर्थः ॥=

॥ शेषो बहुव्रीहिः ।२।२।२३। अधिकारोयं प्राग्द्वंद्वात् ॥ अनेकमन्यपदार्थे ।

२।२।२४ अनेकं प्रथमांतमन्यपदस्यार्थे वर्त्तमानं वा समस्यते स बहुव्रीहिः ।

सप्तमीविशेषणे बहुव्रीहौ ।२।२।३५ सप्तम्यंतं विशेषणं च बहुव्रीहौ प्राक्

प्रयोज्यं ॥ हलदंतात्सप्तम्याः संज्ञायामलुक् ६।३।९ । हलंतादंतात्सप्तम्या अ

लुक् स्यात् संज्ञायां गम्यमानायाम् ॥ त्वचिसारः । कंठेकालः । युधिष्ठिरः ।

वनेकशेरुकः । अरण्येतिलकः ॥ अमूर्द्धमस्तकात्स्वांगादकामे ६।३।१२।

मूर्द्धमस्तकभिन्नाद्धलंतादंताच्च सप्तम्याः अलुक् स्यात् कामभिन्ने उत्तर पदे परतः ॥

सप्तम्यन्तस्य तु कर्त्रीद्यन्वयद्वारे व
क्रियान्वया द्विशेषणत्वे सिद्धे सप्तमी
ग्रहणं वैवेयर्थ्य अधिकरणेर्थे ऽव्यग्र समा
संज्ञापयति ॥=३

शेषो बहुव्रीहिः शेष अस्मिन्विषये कर्मणि घञ् अनयविरुक्त
यत्रान्यस्तु समासो नोक्तः स शेष इत्याह । एकं पदनीयम्निन्नर्थे ऽन्यी
भावादिसंज्ञकः समासो न विहितः स शेष इत्यर्थः इति हरदत्तो व्याख्यम्
एतच्च प्राक्कडारात् परं कार्य्यमिति पाठाभिप्रायेण बोध्यम् । अस्मिं
स्तु पक्षे शेषत्वं तदभावे उन्मत्तगंगमित्यत्र परत्वाद् बहुव्रीहिः स्यात्
एकार्थत्वाद्यर्थाभावादुन्मत्तगंगा । इत्यादि बहुवचने प्रसज्येत ॥ =१

भिन्नं
विशेषणं विगतं व्यधिकरणं स्थानं यस्य सः विभिन्नाधिकरणः
व्यधिकरणः। विगतव्यधिकरणं यस्य सः व्यधिकरणपदः व
मुखेकामोऽस्य= बहुव्रीहिः। सप्तमी विशेषणे इति सूत्रे सप्तमी ग्रहणज्ञापकात्=२

॥ उरसिलोमा। अकामेकिं। मुखकामः। अमूर्द्धमस्तकात्किं। मूर्द्धशिखः। मस्तकशिखः=

कौ. १ | विशेषणपदं चात्र ग्रहणं च स्थित्यार्थेन तदेति इति विशेषपदं तद्गृहीतमेवेति=२
मस्तकशिख॥ अतएव ज्ञापकात् व्यधिकरणपदो बहुव्रीहिः॥ प्राप्तमुदकं | कं=२

ग्रामं प्राप्तोदको ग्रामः। ऊढरथोऽनड्वान्। उपहृतपशूरुद्रः। उद्धृतौदना

स्थाली। पीतांबरोहरिः। वीरपुरुषकोग्रामः॥ प्रादिभ्योधातुजस्यवाच्योवा

चोत्तरपदलोपश्च॥ ॐ। प्रादिभ्यः परं यद्धातुजं तदंतस्य पदांतरेण बहुव्रीहिः

वाचेति। इदन्तु वार्त्तिकम्॥
वाच्यः। वा च पूर्वपद घटितोत्तरपदलोपः॥ प्रपतितपर्णः। प्रपर्णः। प्रपतितं पर्णं यस्मादिति वाक्ये पतित भागस्य तथा भूतस्य लोप एव मन्यमाने॥

ॐ। नञोस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः॥ अविद्यमानपुत्रोऽपुत्रः॥
नञोस्त्यर्थानामिति। नञः परेषां अस्त्यर्थवाचिनां पदान्तरेण बहुव्रीहिर्वाच्यः अस्त्यर्थवाचिनां तु वा लोप इत्यर्थः॥ अस्त्यर्थानां किम्। अनुपनीतपुत्रकः।
नञः किम्। निर्विद्यमानपुत्रः॥

शिव
१

भाषितपुंस्कादनूङ् ऊङोऽभावोऽस्यामिति बहुव्रीहिर्निपातनात् पञ्चम्या अलुक् षष्ठ्याश्च लुक् । तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात् परः ऊङोऽभावो यत्र ॥

तुल्येत्यादि भाषितः पुमान् यस्मिन्नित्यादिव्याख्यानादयमर्थो लभ्यत इति तृतीयादिषु भाषितपुंस्कमित्यत्रोपपादितं भाषितः पुमान्येन तद्भाषितपुंस्कमित्युच्येत तर्हि कुटीभार्यः द्रोणीभार्यः इत्यादावतिप्रसंगः स्यात् भवति हि कुटशब्दो घटे पुल्लिंगो गेहे तु स्त्रीलिंगः द्रोणशब्दस्तु परिमाणविशेषे पुल्लिंगो नौकादन्यां तु स्त्रीलिंग इति ॥=

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादि-
षु ।६।३।३४। उक्तपुंस्कादनूङ्भावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुं-
वाचकस्येव रूपं स्यात् समानाधिकरणे स्त्रीलिंगे उत्तरपदे न तु पूरण्यां
प्रियादौ च परतः ॥ गोस्त्रियोरिति ह्रस्वः ॥ चित्रगुः । रूपवद्भार्यः ॥ अनू-
ङ् किं । वामोरूभार्यः । पूरण्यां तु ॥ अप्पूरणीप्रमाण्योः ।५।४।११६
पूरणार्थप्रत्ययान्तं यत्स्त्रीलिंगं तदन्तात् प्रमाण्यन्ताच्च बहुव्रीहेरप् स्यात् ॥
कल्याणी पंचमी यासां रात्रीणां ताः कल्याणीपंचमा रात्रयः ॥ स्त्री प्रमा-
णी यस्य स स्त्रीप्रमाणः ॥ पुंवद्भावनिषेधोऽप्प्रत्ययश्च प्रधानपूर-

समानाधिकरणे किम् । कल्याण्याः माता कल्याणीमाता । स्त्रियां किम् । कल्याणी प्रधानं यस्य स कल्याणीप्रधानः ॥=३

चित्रा गावो यस्येति लौकिकविग्रहे ॥ चित्रा अस् गो अस् इत्यलौकिकविग्रहे । चित्रगुः ।=४॥

पंचमीति । तस्य पूरणे इति डट् नान्तादसंख्यादेरिति डटो मडागमः । टिड्ढेति ङीप् ॥२

रात्रय इति उद्भूतावयवभेदो ऽत्र समुदायोऽन्यपदार्थः ।=२

प्रमाणीति । करणे ल्युट् तदन्तस्य विशेष्यनिघ्नत्वात् स्त्रियां ङीप् ॥=१

प्रधानपूरण्यामेवेति पुंवद्भावविधौ वार्त्तिके तथाऽभिधानात् कल्याणपञ्चमीकः पक्ष इति भाष्योदाहरणाच्च पुंवद्भावः समासान्तश्च तत्रैवेति भावः ॥=१

वाच्या चेति। अन्यपदार्थघटकतया समासवाच्येत्यर्थः। उद्भूतावयवभेदस्य रात्रिसंबन्धस्य प्रधानत्वेन यथा प्रथमा एकरात्रिः समानो भिधेया तथा पश्चिमस्यापीति रात्रिपदार्थस्यान्यपदार्थेऽनुप्रवेशात् प्राधान्यमिति भावः ॥=१

नद्यृतः तपरत्वं स्पष्टार्थं नद्युत्तरपदादिति नद्यन्तादिति तु नोक्तं कथं त्वयेनसहसमासे कृते बहुव्रीहेः नद्यन्तत्वात् उत्तरपदन्तु नद्यन्तं भवत्येव समासे अन्तस्समासान्तः। इति पदानुसरणादिति बोध्यम् ॥=२

कौ.पु.
८

8

तयामेव। रात्रिः पूरणीवाच्या चेत्युक्तोदाहरणे मुख्या ॥ अन्यत्र तु ॥ न
द्यृतश्च ५।४।१५३। नद्युत्तरपदात् ऋदन्तोत्तरपदाच्च बहुव्रीहेः कप् स्यात् ॥
पुंवद्भावः ॥ केऽणः ७।४।१३। के परे अणो ह्रस्वः स्यात्। इति प्राप्ते न कपि।
७।४।१४। कपि परे ह्रस्वो न स्यात् ॥ कल्याणपंचमीकः पक्षः। अत्र तिरो
हितावयवभेदस्य पक्षस्यान्यपदार्थतया रात्रिरप्रधाना ॥ बहुकर्तृकः।
अप्रियादिषु किं। कल्याणीप्रियः ॥ प्रिया। मनोज्ञा। सुभगा। कल्याणी
। दुर्भगा। भक्तिः। सचिवा। स्वसा। कांता। क्षांता। समा। चपला। दुहिता।
वामा। अबला। तनया ॥ सामान्ये नपुंसकं ॥ दृढं भक्तिर्यस्य स दृढभक्तिः ॥

के एः इत्यत्र कप्रत्यय एव व्याख्यानात् तेन राके त्यादौ न ह्रस्वः ॥=३

सामान्य इति। अप्राधान्यमात्रनिरुक्तिपरत्वेन लिङ्गविशेषविवक्षा नास्तीति भावः। तथा च तद्विवक्षायां दृढाभक्तिरित्यादिसिद्ध्यर्थं प्रियादिषु तस्याः पाठः ॥=२

प्रि.व.
८

॥ ति विंशतेः डित् ६।४।१४२। विंशतेर्भस्य टेर्लोपो डिति ॥ आसन्नविंशाः । विंशतेरासन्ना इत्यर्थः । अदूरविंशाः । अधिकविंशाः ॥ द्वौ वा त्रयो वा द्वित्राः ॥ १६ ॥ दिङ्नामान्यन्तराले । २।२।२६। दिशो नामान्यन्तराले वाच्ये प्राग्वत् । दक्षिणस्याः पूर्वस्याश्च दिशोऽन्तरालं दक्षिणपूर्वा ॥ =

एतायते इत्यादि कर्तुः क्यङ् सलोपश्चेति क्यङ् पुंवद्भावे कृते एतस्याः तयोरकृत्सार्वधातुकयोरिति दीर्घः । दर्शनीयमानीति मन इति णिनिः नान्तेभ्यो ङीप् ॥ =३

स्त्रीत्व विवक्षायां । दृढा भक्तिः ॥ क्यङ्मानिनोश्च । ६।३।३६। एतयोः परतः पुंवत् ॥ एनीयेव आचरतीति एतायते । श्येनीव आचरतीति । श्येतायते । दर्शनीयां स्त्रियं मन्यते दर्शनीयमानी चैत्रः ॥ न कोपधायाः । ६।३।३७। कोपधायाः स्त्रियाः न पुंवत् । पाचिकाभार्यः ।

पाचिकाभार्य इति । पचतीति पाचिका ण्वुल् । युवोरनाकौ इति अकादेशः टापि प्रत्ययस्थादिति इत्वं । =४

रसिकाभार्य इति । रसोऽस्यास्तीति रसिका । अत इनि ठनाविति ठन् । =५ मद्रिकायते इति । क्यङ्मानिनोश्चेति पुंवत्त्वप्राप्तिः । मद्रेषु भवा मद्रिका मद्रवृज्योः कन् सति तु पुंवद्भावे इत्वं न श्रूयेतेति भावः । =३

मद्रिकेवाचरतीति आत्मानं मद्रिकामिव मन्यते । आत्ममाने खश्चेति णिनिः ॥

रसिकाभार्यः । मद्रिकायते । मद्रिकामानिनी ॥ कोपध प्रतिषेधे तद्धितवुग्रहणं कर्तव्यं । नेह । पाका भार्या यस्य सः पाकभार्यः ।

दानक्रियानिमित्तः स्त्रियां पुंसि च संज्ञाभूतोऽयमिति भाषितपुंस्कत्वमस्ति ॥ =१

अनयोः =

संज्ञापूरण्योश्च । ६।३।३८। न पुंवत् । दत्ताभार्यः । पंचमीभार्यः ।

तद्धितवुग्रहणमिति । द्वन्द्वान्ते श्रूयमाणः प्रत्येकं संबध्यते तद्धितग्रहणं वुग्रहणं चेत्यर्थः । पाकाभार्य इति । अर्भकपृथुकपाका वयसीति कप्रत्ययान्तो यमुणादिषु निपातितः । नवायं तद्धितस्य ककारो नापी वः । वयसि प्रथमे ङीपं बाधित्वा अजादित्वाट्टाप् ॥ =२

व्यत्ययेन षष्ठीति सप्तम्यर्थे वमेवेत्याह शयेन याचष्टे बहुव्रीहेरिति ।
साङ्गं च अद्रवं मूर्त्तिमदित्याद्युक्तलक्षणम् । षचः षित्वं ङीष
र्थं सदुदाहरति जलजाक्षीति । =२

दीर्घसक्थ्यनीयसत =

कौ.उ.
९

स्थूलानि अक्षीणि छीद्राणि पर्वाङ्कुरा
णि यस्याः सा

१

व्यत्ययेन षष्ठी

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् ।५।४।११३। स्वाङ्गवाचिसक्थ्यक्ष्यन्ता
द्बहुव्रीहेः षच् ॥ दीर्घसक्थः । जलजाक्षी । स्वाङ्गात्किं । दीर्घसक्थि शक
टं ॥ स्थूलाक्षा वेणुयष्टिः ॥ अक्ष्णोऽदर्शनादिति वक्ष्यमाणोऽच् ॥ द्वित्रि

आभ्यां मूर्द्धः षः स्याद्बहुव्रीहौ =

भ्यां ष मूर्द्ध्नः ।५।४।११५। द्विमूर्द्धः । त्रिमूर्द्धः ॥ अन्तर्बहिर्भ्यां च लोम्नः ॥
५।४।११७। आभ्यां लोम्नोऽप् बहुव्रीहौ ॥ अन्तर्लोमः । बहिर्लोमः ॥
पादस्य लोपोऽहस्त्यादिभ्यः ।५।४।१३८। हस्त्यादिवर्जितादुपमानात्परस्य
पादस्य लोपः स्यात्तद्बहुव्रीहौ ॥ व्याघ्रस्येव पादावस्य व्याघ्रपात् । अर्थेद

अर्थं अदिसमासान्तो न स्यात् तदा ऽहस्त्यादिभ्य इति परस्येति
शि = निर्देशेन दे आदेः परस्येति परिभाषया पादशब्दस्यादेरा
कारलोपः स्यात् । =१ ॥ स्थानिद्वारेण अयं समासान्तः । =१

शिव
२

स्त्र्यादिभ्यः किं । हस्तिपादः । कुसूलपादः ॥ संख्यासुपूर्वस्य ५।४।१४० । पादस्य
लोपः स्यात्समासांतो बहुव्रीहौ ॥ द्विपात् । सुपात् ॥ उद्विभ्यां काकुदस्य ५।४।१४८
लोपः स्यात् । उत्काकुत् । काकुदं तालु । विकाकुत् ॥ पूर्णाद्विभाषा । ५।४।१४९
पूर्णकाकुत् । पूर्णकाकुदः ॥ सुहृद्दुर्हृदौ मित्रामित्रयोः ५।४।१५० सुदुर्भ्यां
हृदयस्य हृद्भावो निपात्यते । सुहृन्मित्रं । दुर्हृदमित्रः ॥ अन्यत्र । सुहृदयः ।
दुर्हृदयः । उरःप्रभृतिभ्यः कप् ५।४।१५१ । उरःप्रभृत्यंताद्बहुव्रीहेः कप् स्या
त् । व्यूढं विशालमुरो यस्य स व्यूढोरस्कः ॥ कस्कादिषु च ॥ एष्विण उत्तरस्य सोपदादौ वृत्ति विसर्जनीयस्य सः = २
विसर्गस्य षो ऽन्यस्य तु स इति सः । व्यूढोरस्कः । प्रियं सर्पिर्यस्य स प्रियसर्पिष्कः ॥ इणः ष इति विसर्गस्य षत्वम् ॥ =१

अनुक्तसमासांतादिति ॥ समासांतान्तापेक्षयैव शेषइत्याशयः॥ परे तु नैवेहकवपेक्षया शेषत्वग्रहणं नापि समासान्तमात्रापेक्षया किन्तु अनंतरं यो बहुव्रीहि अधिकार उक्तः शेषो बहुव्रीहिरिति तदपेक्षयैव शेषाग्रहणमित्याहुः। प्राञ्चस्तु॰॥१॥

शेषाधिकारस्यार्कि। उपबहवः। तंत्रादिना शेषशब्दोऽर्थी दृश्य परः॥ =१॥

कौ॰ पु॰ १०

10

शेषाद्विभाषा ५।४।१५४ अनुक्तसमासांताद्बहुव्रीहेः कप्

वा॥ महायशाः। महायशस्कः। अनुक्तेत्यादि किं व्याघ्रपात्॥ वंदिते भ्रा

तुः ५।४।१५७। पूजार्थभ्रात्रंतात्कप्। प्रशस्तो भ्राताऽस्य प्रशस्तभ्राता।

सुभ्राता। वंदिते इति किं। मूर्खभ्रातृकः॥ निष्ठा २।२।३६। निष्ठान्तं बहु

व्रीहौ प्राक्प्रयोज्यम्॥ कृतकृत्यः। युक्तयोगः॥ इति बहुव्रीहिः॥ ४॥

चार्थे द्वन्द्वः॥ २।२।२९॥ अनेकं सुबंतं चार्थे वर्त्तमानं वा समस्यते स द्वन्द्वः।

समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः। समुच्चये उदाहरणमा

ह। तत्रेश्वरं गुरुं च भजस्वेति॥ परस्परनिरपेक्षस्य अनेकस्य एकस्मि

परस्परनिरपेक्षस्येति एकस्य क्रियान्वयोत्तरमेव परस्यान्वयो तदन्वय इति। न तयोः परस्पराकांक्षा॥ =१

अभिवादनस्तुतिरूपो भयार्थकवन्दिधातुनो भयस्याधारणपूजा लक्ष्यते इत्याशयेनाह। पूजितेऽर्थे यो भ्रातृशब्द इति॥ =२

कृतकृत्ययोः क्रियाशब्दत्वाद नियमप्राप्ते वचनम्॥ =५॥

अनेकमन्यपदार्थे इत्यतोऽनेकमित्यनुवर्त्तते सुपामंत्रित-इत्यस्मात् सुबिति च। चार्था इति चशब्दद्योत्या इत्यर्थः॥ =६

एकस्मिन्निति भजनादावित्यर्थः। एकधर्मावच्छिन्ने इत्यर्थः॥ =१

शिव

१०

अनुषंगिकत्व =

असामर्थ्यादिति। एकार्थीभावाभावा दित्यर्थः =२

आनुषंगिकत्वमनुदेश्यत्वमन्यतरस्य प्रधान्यत्र तस्मिन्संबंधि क्रियायां आवश्यकर्तव्यत्वरूपं तथा च समभिव्याहृतक्रियादिगतमानुषंगिकत्वं यत्रातत्र मन्वाचयश्चकारार्थः =२

अनुद्भूतावयवभेदः समूहः समाहार इत्यर्थः =३

न्वयः समुच्चयः। भिक्षामट गां चानयेति। अन्यतरस्यानुषंगिकत्वेना
न्वयोऽन्वाचयः। अनयोरसामर्थ्यात्समासो न। धवखदिरौ छिंधीति।
मिलितानामन्वय इतरेतरयोगः। संज्ञापरिभाषमिति समूहः समाहा
रः॥ राजदंतादिषु परं २।२।३१। एषु पूर्वप्रयोगार्हं परं स्यात्॥ दंतानां
राजा राजदंतः॥ धर्मादिष्वनियमः॥ अर्थधर्मौ धर्मार्थौ॥ दंपती।
जंपती। जायापती॥ जायाया जंभावो दंभावश्च वा निपात्यते। आकृ
तिगणोऽयं॥ द्वन्द्वे घि २।२।३२॥ द्वन्द्वे घिसंज्ञं पूर्वं स्यात्। हरिहरौ॥ अजा
द्यदंतं। २।२।३३। इदं द्वंद्वे पूर्वं स्यात्॥ ईशकृष्णौ॥ अल्पाच्तरम् २।२।३४।

मिलितानामिति परस्परापेक्षाणामुद्भूतावयवभेदकसमूहरूपाणामित्यर्थः। अन्वय इत्यस्यैकधर्मावच्छिन्नेनान्वय इत्यर्थः =३

राजदन्तादिष्विति। इदं च सर्वसमासविषयं षष्ठीसमासकर्मधारयद्वन्द्वसमासनिष्ठानां गणे पाठात् =४

धर्मादिष्विति। द्वन्द्वविषयमेतत्। तेच राजदन्ताद्यन्तर्गणाः =५

जायापती इति। अस्य हि तत्रेऽपि पत्युर्न पूर्वनिपातः राजदन्तादिगणे पाठात् इति बोध्यम्

हरिश्च हरश्च =२ म=३

द्वन्द्वे घि सर्वेषामेव प्रथमाभिहितत्वेनोपसर्जनत्वाविशेषादनियमे प्राप्ते वचनमारम्भः =२

द्वन्द्वे घी त्यादिसूत्रस्य बह्वच्कत्वात् अभ्यर्हितमित्यस्य
परत्वात् सर्वापवादत्वात् तेन वासुदेवार्जुना
वित्यत्रार्जुनस्याल्पाच्तरत्वेऽपि च न पूर्वनिपातः।
। एवमन्यत्रापि बोध्यम्॥=३

ऋतुनामानुपूर्व्यं प्रादुर्भावकृतं
नक्षत्राणामुदयकृतमिति बोध्यम्=१

कौ॰कु॰
११

शावकेशावौ। ऋतुनक्षत्राणां समानाक्षराणामानुपूर्व्येण। हेमन्तशिशिर
वसन्ताः। कृत्तिकारोहिण्यौ। समानाक्षराणां किं। ग्रीष्मवसन्तौ। लघ्वक्षरं
पूर्वं। कुशकाशं। अभ्यर्हितं च। तापसपर्वतौ। वर्णानामानुपूर्व्येण।
वद्य॥
ब्राह्मणक्षत्रियविट्शूद्राः। भ्रातुर्ज्यायसः। युधिष्ठिरार्जुनौ॥ पि
तामात्रा॥ मात्रासहोक्तौ पिता वा शिष्यते। पितरौ मातापितरौ॥ द्वन्द्व
श्च प्राणितूर्यसेनाङ्गानाम्। २।४।२॥ एषां द्वन्द्व एकवत्॥ पाणिपादं।
मार्दङ्गिकपाणविकं॥ रथिकाश्वारोहम्॥ जातिरप्राणिनां २।४।६। धा
धानाशष्कुलि
प्राणिवर्जितानां जातिवाचिनां द्वन्द्व एकवत्। धानाशष्कुलि। प्राणिनां तु।

युधिष्ठिरार्जुनाविति इंद्रयुक्तत्वा
द्धिबला रंशात्वाद्वा अभ्यर्हित
त्वमर्जुनस्यास्तीति न तेन नि
यमः सिध्यतीति भावः=४

प्राणितूर्यसेनाङ्गानामित्यत्राङ्ग
शब्दस्य प्रत्येकमन्वयस्तत्राद्य
न्तयोरवयवपरत्वात् मध्यस्य
कार्योपकारकपरता तेन तूर्या
ङ्गपदेन वाद्यकारा एवोच्यन्ते तद
तदुदाहरणेन ज्ञापयति मार्दङ्गि
कपाणविकमिति एवाश्च प्रा
ण्यङ्गानां प्राण्यङ्गेन तूर्याङ्गानां
तूर्याङ्गेन सेनाङ्गानां सेनाङ्गेने
त्येव नियम्यम् तेन मार्दङ्गिक
रथिकौ मार्दङ्गिकाश्वारोहा
वित्यादिः स्यादेव॥ समाहार एवेति। समाहारे प्राण्यङ्गा
दीनामेवैकवद्भाव इति नियमः। विपरीतनियमस्तु न भवितु
मर्हति निष्प्रयोजनत्वादिति बहुवचननिर्देशात्॥=

पाणिनिवादनमिति। प्राण्यङ्गत्वो
पचारेण पाणित्वात्। जातिरप्राणि
नामित्यनेन नैकत्वापत्तेः॥=३
मृदङ्गवादनं शिल्पमस्येति
ठक् एवं पाणविकमित्यपि॥२
रथेन चरन्तीति रथिकाः पर्या
दिभ्यः ष्ठन्निति ष्ठन् ते चाश्व
रोहाश्च तेषां समाहारः=२
जातिरिति पर्युदासे प्रयमेति
तदाह जातिवाचिनामिति।
इह प्राणिशब्देन मुख्यस्यैव
ग्रहणं। जातिः किं नन्द
कपाञ्चजन्यौ हरेः

समाहारस्यैकत्वादेकत्वे सिद्धे नियमार्थं प्रकरणम्
प्राण्यङ्गादीनां समाहार एव यथा स्यात्=२

शाव॰
तौ कौ॰ सं॰ पृ॰ २२
दन्तोष्ठं गमनागमनं नैषा जातिस्तस्मात्॥=२

८ विशिष्ट । नद्या नदीवाचकेन देशस्य च देशवाचकेन द्वन्द्व इत्यर्थः तेन गङ्गापाटलिपुत्रे इत्येव ग्रामपदेन तेह नगरं गृह्यते तेन मथुरापाटलिपुत्रमित्येव नदीपदेन नदस्यापि ग्रहणं अन्यथा भिन्नलिंगत्वासंभवात् ॥ विशिष्टपदसामर्थ्यमाह भिन्नलिंगानामिति विप्रुषी हि शिशिरे इत्यर्थः ॥ = १

विशस्य ... द्राक्ष

विप्रुड्द्राः ॥ विशिष्टलिंगो नदीदेशोऽग्रामाः । २।४।७॥ ग्रामवर्जनदीदेशवाचिनां भिन्नलिंगानां समाहारे द्वंद्व एकवत् ॥ उध्यश्च इरावती च उध्येरावती ति ॥ गंगा च शोणश्च गंगाशोणं । कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रं । भिन्नलिंगानां किं । गंगायमुने । मद्रकेकयाः ॥ अग्रामाः किं । जांबवं नगरं । शालूकिनी ग्रामः । जांबवशालूकिन्यौ । क्षुद्रजंतवः । २।४।८। एषां समाहारे द्वंद्व एकवत् । यूकालिक्षं । आनकुलात् । क्षुद्रजंतवः ॥ येषां च विरोधः शाश्वतिकः । २।४।९। एषां प्राग्वत् । अहिनकुलं । गोव्याघ्रं ॥ गवाश्वप्रभृतीनि च २।४।११॥

आनकुलात् नकुलपर्यन्ता इत्यर्थः =

येषां च विरोधः ॥ विरोधो विदेको न तु सहावस्थानं तेन छायातपौ इति सिद्धं । शश्वदित्यव्यय मनेक कालस्थेत्यस्य वर्त्तते तत्र भवः शाश्वतिकः कालात् ठञ् ॥ त =

पाद्यदि । भस्मना शुद्ध्यते कांस्य गा मित्यादि संस्कारे एष्ये भुक्ते पात्रे न शुद्ध्यति ते पामित्यर्थः =

काकोलूकमित्यादौ स्वरत्वाद्विभाषा द्वंद्वे ति प्राप्ते च कारेण बाध्यते ॥ शूद्राणामनिरवसितानां २।४।१०। अवहिष्कृतानां शूद्राणां द्वंद्व एकवत् ॥ तक्षायस्कारं । पात्राद्बहिष्कृतानां तु । चांडालमृतपाः ।

यथोच्चारितानि इति गणपाठे यथा पठितानि तथैव नान्यथेत्यर्थः ।
तेन गवाश्वमित्यत्र पररूपसन्धिपक्षादौ गोऽश्वा गोअश्वा इत्येवेति
बोध्यम् । इह गणे पाठाच्च पशुद्वन्द्वे गवाश्वादौ विभाषा बाध्यते बाध्य
ते च दासीदासमित्यादौ पुमान्स्त्रियेत्येकशेषः ॥=१

विभाषावृक्षेति । सूत्रेऽप्राणिनां तेषां ग्रहणम् । जातिरप्राणिना
मिति नित्ये प्राप्ते विकल्पार्थम् । पशुग्रहणं हस्त्यश्वादिषु से
नाङ्गत्वान्नित्ये प्राप्ते मृगाणां मृगैरेव शकुनीनां तैरेवोभयग्र
द्वन्द्वः अन्यैः क्षुद्रजन्तुसहेतरेतरयोग एवेति नियमार्थं मृगशकुनि
ग्रहणम् । एवं पूर्वापरमधरोत्तरमित्यपि । अश्ववडवग्रहण
न्तु पक्षे नपुंसकत्वार्थम् । अन्यथा
परत्वात्पूर्ववदश्ववडवावित्येव स्या
त् =१

कौ० ३
१२
विशेषाणामिति । स्वरूपं शब्दस्येति
सूत्रभाष्ये वृक्षादीनां वृक्षविशेषवा
चित्वस्यैवोक्तत्वात् पूर्वोक्तलक्षणमिति
भावः । अत्र च वृक्षादि सप्तकं वृक्षा
दि सर्वावयवकसमुदाय एव तत्तु
विभिन्नावयवकेऽपि तेन व्रीहिकुश
वृत्तमित्यादौ नास्य प्रवृत्तिरिति द्र
ष्टव्यम् ॥=४

12

यथोच्चारितानि साधूनित्युः । गवाश्वं । दासीदासमित्यादि ॥ विभाषावृक्ष
मृगतृणधान्यव्यंजनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणां २।४।१२।
वृक्षादीनां सप्तानां द्वंद्वः अश्ववडवेत्यादि द्वंद्वत्रयं च वा प्राग्वत् ॥ वृक्षा
दौ विशेषाणामेव ग्रहणं ॥ प्लक्षन्यग्रोधं । प्लक्षन्यग्रोधाः । रुरुपृष
तं । रुरुपृषताः । कुशकाशं । कुशकाशाः । व्रीहियवं । व्रीहियवाः । दधि
घृतं । दधिघृते । गोमहिषं । गोमहिषाः । शुकबकं । शुकबकाः । अ
श्ववडवं । अश्ववडवौ । पूर्वापरं । पूर्वापरे । अधरोत्तरं । अधरोत्त
रे ॥ ॐ ॥ फलसेनावनस्पतिमृगशकुनिक्षुद्रजंतुधान्यतृणानां

आनङोऽङित्वादन्त्यादेशे न लोपः नपरकरणं तु उरण् रपर इति रपरत्ववारणाय । अग्निश्च यथाक्रम
मन्वयात् विद्यासंबन्धेन योनिसम्बन्धवतः समासे नानङ् सम्बन्धस्य द्विष्ठत्वात् एकस्य तथात्वे
ऽपरस्य तथात्वाभावात् तेन होतृपितरौ इति होतृपोतारौ पितापौत्रौ = ३

बहुप्रकृतिरिति । बहुवचनान्तं सर्वावयवक इत्यर्थः ।
तेनैकद्विप्रकृतिके तदेतरयोगेऽवात एवा तितैरथ
नागाश्वेदित्यादिप्रयोगसिद्धिः ॥ = १

आनङ् ऋतो द्वंद्वे ६।३।२५ वि
द्यायोनिसंबंधवाचिनामृदंता
नां द्वंद्वे आनङादेशः स्यादुत्तर
पदे । होतापोतारौ । मातापितरौ ।
पुत्रेऽन्यतरस्यामित्यतो मण्डूकप्लु
त्यापुत्र इत्यनुवर्तते । पितापुत्रौ ॥
= ३ इति मूलेः ॥

ईदग्नेः । आनङोऽपवादोऽयम् देव
ताद्वन्द्वे वा इत्येवेति इदम्बवृत्ति
ग्रंथेऽस्थितम् ॥ = ५

अग्नेः स्तुत्स्तोमसोमाः इति निषेधे
प्राप्तेऽयमारंभः = २

बहुप्रकृतिरेव द्वंद्व एकवदिति वाच्यम् ॥ ॥ बदराणि चामलकानि
च बदरामलकं । जातिरप्राणिनामित्येकवद्भावः । नेह । बदरामलके ।
रथिकाश्वारोहौ । छत्रन्यग्रोधौ । इत्यादि ॥ देवताद्वंद्वे च । ६।३।२६ ।
इहोत्तरपदे परे आनङ् । मित्रावरुणौ ॥ वायोः प्रयोगप्रतिषेधः ।
अग्निवायू । वाय्वग्नी ॥ ईदग्नेः सोमवरुणयोः । ६।३।२७ । देवता
द्वंद्वे इत्येव ॥ अग्नेः स्तुत्स्तोमसोमाः । ८।३।८२ । अग्नेः परेषामेषाम्
स्य षः समासे । अग्निष्टुत् । अग्निष्टोमः । अग्नीषोमौ । अग्नीवरु
णौ ॥ इद्वृद्धौ ६।३।२८ । वृद्धिमत्युत्तरपदे अग्नेरिदादेशो देवताद्वंद्वे ॥

देवतेति अदंतभिन्नार्थं विद्यायो
निसम्बन्धभिन्नार्थं चेदम् = १३

पुनर्द्वन्द्वग्रहणं प्रसिद्धसाहचर्यस्य
परिग्रहार्थम् । तेन ब्रह्मप्रजापती
इत्यादौ नानङ् । एतद्धि नैकह
विर्भागित्वेन श्रुतं नापि लोके प्रसि
द्धं साहचर्यम् ॥ ५ ॥

इद्वृद्धौ तकार उच्चारणार्थः । इकार
स्येकारविधानं तु बाधकबाधनार्थम्
वृद्धिश्चेदेनाग्नेर्वृद्धिमाग्नेरुत्तरपदस्य संभवा
दतो व्याचष्टे वृद्धिमत्युत्तरपद इति = १

अग्निः स्तूयतेऽस्मिन् सोऽग्निष्टुत्
क्रतुविशेषः । संपदादित्वादधिकर
णे क्विप् । अग्नीनां स्तोमो ऽग्निष्टोमः
सोमयागस्य संस्था सा या संस्था उच्यते ॥ = २ ॥

॥ सास्य देवता अनेन व्याख्या॥

अग्नामरुतौ देवतेऽस्य आग्निमारुतं कर्म। अग्नीवरुणौ देवतेऽस्य

उत्तरपदवृद्धिः॥ कौ·(कु· १३ कौमुद्याः॥

आग्निवारुणं कर्म॥ देवताद्वन्द्वे च त्युभयपदवृद्धिः। विशेषेण। अ

अग्नावैष्णवमिति। इति प्रतिपदि तयोरेकहविर्भोक्तृत्वेन साहचर्यात् देवताद्वन्द्वे इत्यनेनानङ् ॥ =३

ग्नावैष्णवं॥ दिवो द्यावा ६।३।२९। देवताद्वन्द्वे उत्तरपदे। द्यावाभू

मी। द्यावाक्षमे॥ मातरपितरावुदीचां। ६।३।३२। मातरपितरौ।

मातुररङादेशाभावार्थं सूत्रम्॥ =४

13

उदीचां किं। मातापितरौ॥ द्वन्द्वाच्चुदषहान्तात्समाहारे। ५।४।१०६।

वाक्च त्वक्च

चवर्गान्ताद्दषहान्ताच्च द्वन्द्वात्टच् समाहारे। वाक्त्वचं। त्वक्स्र

पत्थर छिट्टच उपानहश्च

जं। शमीदृषदं। वाक्त्विषं। छत्रोपानहं। समाहारे किं। प्रावृट्

वाक्त्वचमिति। बहूनां द्वन्द्वे वाक्स्रुक्त्वचमिति। द्वन्द्वगर्भद्वन्द्वे तु वाक्स्रजत्वचमिति विशेषः। मतो। =६

शरदौ॥ इति द्वन्द्वः समासः। श्रीशारदायै नमः। राम। शुभम्।

शिव· १३

अथैकशेषः ॥ विरूपाणामपि समानार्थानां ॥ वक्रदंडश्च कुटिलदंडश्च वक्रदंडौ ॥ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ।१।२।६५। यूना सहोक्तौ गोत्रं शिष्यते । गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात् । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । वृद्धः किं । गर्गगार्ग्यायणौ । यूना किं । गर्गगार्ग्यौ । तल्लक्षणः किं । भागवित्ति भागवित्तिकौ । कृत्स्नं किं । गार्ग्यवात्स्यायनौ । स्त्री पुंवच्च ।१।२।६६। यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत् । गार्गी च गार्ग्यायणश्च गार्ग्यौ । पुमान् स्त्रिया ।१।२।६७। स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षण एव वि

अपत्यमन्तर्हितं वृद्धमिति । पूर्वाचार्यैः परिभाषितस्य गोत्रापरपर्यायस्य वृद्धपदेनग्रहणमित्याह गोत्रमिति । गोत्रं यूनेत्येव तु न सूत्रितं अपत्याधिकारादन्यत्र लौकिकं गोत्रग्रहणमिति ज्ञापनात् तेन औपगवश्चानन्तरः औपगविश्च युवेत्यत्र नैकशेषः ॥=२

सूत्रप्रतीकं सरूपाणाम् ॥ रामो रामाः ॥३॥

विरूपाणामिति । एकार्थकत्वे सति विभिन्नानुपूर्वीकाणामित्यर्थः ॥=१

मात्रपदेन प्रत्ययार्थकुत्सनादेः प्रकृत्यार्थस्य च व्यवच्छेदः । तदाह कृत्स्नमिति । एतदेव कारणं यत् तत्कृत एव विशेषश्चेन्न तु तदन्यकृतापि रिक्त इत्यर्थात् =३

अत इञ् । वृद्धेति पर्याप्तावादेः । यस्येति च । भागवित्तस्य गोत्रापत्यं भागवित्तिरित्यस्मात् वृद्धिर्छाहुकसौवीरेषु बहुलमिति कुत्सायां ठक् । इह कुत्सा सौवीरत्वं चाधिकमपेक्ष्यते न तु युवत्वमात्रकृतं वैरूप्यमिति न प्रसंग इति भावः ॥=५

स्त्री पुंवच्च । स्त्रीत्वस्य वैरूप्यकारणस्याधिक्यात् पूर्वेणाप्राप्तौ वचनं तल्लक्षणश्चेदित्यादि सर्वमपि सर्वं यु... ते तेन भागवित्तिकश्च गार्गी च वात्स्यायनश्च त्यादौ न ... पुंवद्भावप्रयुक्ते वैरूप्ये तल्लक्षणत्वं स्फुटीकर्तुं द्विवचनान्ते न हि ... अहमाह गार्ग्यायण इति ॥=२

तल्लक्षणः किमिति । तल्लक्षण एव किमिति । प्रश्नार्थः ॥=५

कृत्स्नं किमिति । एवकारेण प्रकृत्यर्थस्याधिक्यारत्ति: किमिति प्रश्नः ॥= गार्ग्यवात्स्यायनौ नयोः प्रकृत्यंशे वैरूप्यं न प्रत्ययादिकृतमिति न प्रसङ्ग इत्युपाशयः =१३

स्त्रिया मित्यनुवृत्ति ॥

पुमान् स्त्रिया इति । अर्थपुंवत्त्वादिदं शाकलमाह । अनुवर्तमाने इति । अस्त्रियामित्यस्यानुवृत्तिश्च तद्राजस्य बहुषु तेनैवास्त्रियामिति सूत्रात् ॥=२

गर्गाः इति । अस्त्रियामित्यनुवर्तमाने । अत्र लोपश्चेति लुक् ॥=२

पुमान् स्त्रियैकप्रयोगेक विभक्तौ विलनुवर्तते एकविभक्तौ तद्धितरकृत विरहश्चेदित्यर्थः । अत एव ... लशब्दयोर्नैकशेषः स्यात् एकविभक्तौ मातरौ मातरावित्या ... पुमदनेन स्त्रीबाधात् =२

तल्लक्षण एव विशेषश्चेदिति किम् । इन्द्रेन्द्राण्यौ अत्र इन्द्राण्याः पुंयोगनिमित्तकविशेषवत्त्वेन तल्लक्षणत्वम् ॥=१

नपुंसकं । अन्यतरस्यामित्यस्यैकवचनमित्यनेनैव सम्बन्धः आनन्तर्यात् तदर्थकं च शब्दादेत्याह तच्च वेति । अत्र अनपुंसकेनेति किम् । शुक्लश्च शुक्ला च शुक्लाविति ॥४॥— एकवदिति । अस्यैवैकवद्भावबोधनार्थमिदं तेनान्यसूत्रांशं समाहारद्वन्द्वविषये न प्रवृत्तिस्तेन घटमित्यादि नेति वाच्यम् ॥ अत्र तल्लक्षणकृत इति किम् । हिमहिमान्यौ अत्र महत्वादिकृतो विशेषः ॥=४॥

अश्वाइमे । इमसंस्त्रगाढीमूलकापाठ ॥ इह सर्वैरेव अंतरङ्गत्वात् सुबुत्पत्तेः प्रागेवैकशेषकृतेऽनेकसुबन्ताभावात् द्वन्द्वोन ॥ इति ॥ तेन नाम द्वन्द्वसमासत्वयोरभावेन । शिरसी शिरांसीत्यादौ समासैसस्यैत्यन्तोदात्तः । प्रातिपदिकत्वादेकवद्भावश्चन । एकवदिति । द्वन्द्वश्च प्राणीत्येतत्कृत नियम इत्यर्थः । पन्थानौ । पन्थान इत्यादौ समासान्तोन ॥ = ॥ =

कौ॰ पु॰
२४

हंसी च हंसश्च हंसौ ॥ भ्रातृपुत्रौ स्वसृदुहितृभ्यां ।१।२।६८। भ्रा
ता च स्वसा च भ्रातरौ । पुत्रश्च दुहिता च पुत्रौ ॥ नपुंसकमनपुं
सकेनैकवच्चास्यान्यतरस्याम् ।१।२।६९। अक्लीबेन सहोक्तौ क्लीबं
शिष्यते ॥ तच्च वा एकवत् । तल्लक्षण एव विशेषश्चेत् । शुक्लः प
टः शुक्ला शाटी शुक्लं वस्त्रं तदिदं शुक्लं । तानीमानि शुक्लानि ॥
पिता मात्रा ।१।२।७०। मात्रा सहोक्तौ पिता वा शिष्यते । माता च पि
ता च पितरौ । मातापितरौ । श्वशुरः श्वश्र्वा ।१।२।७१। श्वश्र्वा
सहोक्तौ श्वशुरो वा शिष्यते ॥ श्वश्रूश्च श्वशुरश्च । श्वशुरौ । श्वश्रू
श्वशुरौ ॥ इत्येकशेषः ॥

सर्वैरिति । सर्वैस्त्यदादिभिरन्यैश्चेत्यर्थः । सर्वैः किं । प्रत्यासत्त्या त्यदादिभिरित्यर्थो माभूत् ॥ उपस्थितेपरित्यज्य अनुपस्थितकल्पने मानाभावात् ॥ इति प्रत्यासत्त्यन्यायः ॥=
यत्परमिति । गणीयक्रमगपरत्वमिदिपर्यन्ताना मिति नियमो नास्ति । अहत्त्वमर्वाश्चावामिति भव्याक्तेः =॥
त्यदादितइति । त्यदादीनां शेषे सह विवक्षिते यः पुमान् यश्च नपुंसकं तदशेन लिंगवृत्तिपादकानि भवन्त्यर्थात् त्यदादीन्येवेत्यर्थः पुंनपुंसकतइत्युक्तेः स्त्रिया सहैकशेषेऽपि तथेति भावः ॥=॥
मातेति=
तानिसेंअगाढीमूलकापाठ ॥ पुन्नपुंसकयोस्तु परत्वान्नपुंसकं शिष्यते ॥ इति । तच्च देवदत्तश्च । तौ । =॥
स्त्री शिष्यतेऽस्य सेंअगाढीमूल ॥ पुमान्स्त्रियेत्यस्यापवादः । इति । =॥
एतौ गावाविति ॥ एक इमाः इति । एतेच इमाश्च इमाः । इति =॥=। एकशेषस्यानेकविषयत्वादेवानेकपरिग्रहे सिद्धे संघग्रहणसामर्थ्याद्दृष्टो समुदायो ग्रहस्तइति भावः ॥ =॥=

माता पितराविति । पितुर्दशगुणं माता गौरवेणातिरिच्यते इत्युक्तेर्मातुरभ्यर्हितत्वात् पूर्वनिपातः =२

शुक्लः शुक्ला शुक्लमित्येव विग्रहः पटः शाटीत्यादि प्रदर्श्य नन्तु शुक्लशब्दस्य गुणिलिंगत्वस्फोरणाय ॥ =४

शि॰ व॰
२४

साधारणसमासान्तानाह। ऋगित्यादि
अक्षेयेति अक्षसंबन्धिनी या धूरित्यर्थः सम्बन्धिनो ऽधिकरणत्वविवक्षया सप्तमी। योग्यत्वादक्ष इत्यस्य धूरित्यनेनैव सम्बन्धः॥=१

ऋक्पूरब्धूःपथामानक्षे।५।४।७४। अ अनक्षे इतिच्छेदः। ऋगाद्यंतस्य समासस्य अप्रत्ययोंतावयवो अक्षे या धूस्तदंतस्य न। अर्द्धर्चः। अनचवबह्वचावध्येतर्य्येव॥नेह॥ अनृक्साम। बह्वृक्सूक्तं। विष्णोः पूः। विष्णुपुरं। विमलापं सरः॥ ऊदनोर्देशे।६।३।९८। अनोः परस्य अपस्य ऊत्स्याद्देशे। अनूपो देशः। राजधुरा। अक्षे तु। अक्षधूः। दृढधूः अक्षः। सखिपथः। रम्यपथो देशः। अक्ष्णोऽदर्शनात्।५।४।७६। अचक्षुःपर्यायादक्ष्णोच् स्यात्॥ समासान्तः। गवामक्षीव गवाक्षः॥ संख्याया नदीगो

अध्येतर्य्येवेति अध्येतृत्वयोग्यतावत इत्यर्थः। अध्ययनस्त्रोपक्ष्यतत्वा दृक्समबन्ध्येव=३

अप इति। कृतसमासान्तानुकरणम्। षष्ठ्यर्थे प्रथमा सम्योऽपस्य इत्यात्=द्विगीता आपो यस्मिन्निति वीपम्॥=

करणत्वेनाक्षुद्रश्यदर्शनशब्दो योगरूढिभ्यां चक्षुपरः तत्पर्युदासे ऽक्षिपदं तत्सदृशपरमित्याशयेनाह। गवामक्षीव॥=१

हूनाः समुदाया व्रगरहा तइ।तना५

पद्मं नाभौ यस्येति विग्रहे समासः गड्वादेः
परा सप्तमीति सप्तम्याः परनिपातः =२

अच् प्रत्ययान्वयपूर्वात्सामलोम्नः =

न =२

15

कौ. ३.
१५

दावरीभ्यां च ॥ पंचनदं । सप्तगोदावरं । अचि इति योगविभागादन्यत्रापि । पद्मनाभः ॥ अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः । ५।४।७७। एते अजंता पंचविंशतिर्निपात्यंते । उपाभ्यां चतुरोऽजिष्यते । त्रिचतुराः । चतुर्णां समीप उपचतुराः ॥ ब्रह्महस्तिभ्यां वर्चसः ५।४।७८

अच् स्यात् । ब्रह्मवर्चसं । हस्तिवर्चसं । पल्यराजभ्यां चेति वक्तव्यम् ।

आद्यास्त्रयो बहुव्रीहयः । अविद्यमानानि चत्वार्यस्य अचतुरः । विचतुरः । सुचतुरः । उपाभ्यां चतुरोऽजिष्यते । त्रयो वा चत्वारो वा इति विग्रहः संख्ययाव्ययासन्नेति समासः त्रिचतुराः । उपचतुराः । तत एकादशद्वन्द्वाः । स्त्रीपुंसौ । धेन्वनडुहौ । ऋक्सामे । वाङ्मनसे । अक्षिणी च भ्रुवौ च अक्षिभ्रुवमिति प्राण्यंगत्वादेकवद्भावः । दाराश्च गावश्च दारगवम् ।

ऊरू च अष्ठीवन्तौ च ऊर्वष्ठीवम् । निपातनाट्टिलोपः । पदष्ठीवम् । निपातनात् पादशब्दस्य पद्भावः । उभयत्र द्वन्द्वैकवद्भावः । नक्तं च दिवा च नक्तंदिवम् । रात्रौ च दिवा च रात्रिंदिवम् । रात्रेर्मान्तत्वं निपात्यते । अहनि च दिवा च अहर्दिवम् । वीप्सायां द्वन्द्वो निपात्यते । अहन्यहनीत्यर्थः । द्वन्द्वो निपात्यत इति विरूपाणामपि समानार्थानामेकशेषं वाधित्वा इति शेषः । सरजसमिति साकल्येऽव्ययीभावः । बहुव्रीहौ तु सरजः पंकजम् । निश्चितं श्रेयः निःश्रेयसम् । तत्पुरुष एव । नेह । निःश्रेयान् पुरुषः । निःश्रितं श्रेयो येनेति विग्रहः । पुरुषस्य आयुः पुरुषायुषम् । ततो द्विगुः । द्व्यायुषम् । त्र्यायुषम् । ततो द्वन्द्वः । ऋग्यजुषम् । ततः स्त्रियाः कर्मधारयाः । जातोक्षः । महोक्षः । वृद्धोक्षः । शुनः समीपम् उपशुनम् । टिलोपाभावः संप्रसारणं च निपात्यते । गोष्ठे श्वा गोष्ठश्वः ॥ =२

॥ब्रह्मणः वर्चः इति ब्रह्मवर्चसम् ।
एवं हस्तिवर्चसमिति =१

शि. १५

किमः क्षेपे । क्षेपग्रहणं इहत्कुमशकं
प्रतिपदोक्त परिभाषया किं क्षेप इति विहि
त समासस्यैव ग्रहणं सू॥ =४

किं क्षेपे २।१।६४॥ क्षेपे किम् प्राक् समस्यते॥
कुत्सितो राजा किंराजा । यो न रक्षति । किमः
क्षेपे इति समासान्त निषेधः ५
राजाहः सखीति टच् प्राप्तः गोरतद्धित लुकि
प्राप्तः निषेधः ॥ =

पलमर्हतीति पल्यः =१

॥ पल्यवर्चसं । राजवर्चसं ॥ उपसर्गादध्वनः । ५।४।८५। प्रगतो
ध्वानं । प्राध्वो रथः ॥ न पूजनात् ५।४।६९। पूजार्थात्परे भ्यः समा
सांता न स्युः । सुराजा । अतिराजा । स्वतिभ्यामेव । नेह । परमराजः । ४ पूजनात् किं । जाम सिकाकोऽतिशयः ॥ सूत्र
॥ किमः क्षेपे । ५।४।७०। कुत्सितो राजा किंराजा । किंसखा । किं
गौः ॥ नञस्तत्पुरुषात् ५।४।७१। समासांतो न । अराजा । असखा ।
तत्पुरुषात् किं । अधुरं शकटं । पथो विभाषा ५।४।७२। नञ
पूर्वात्पथः समासांतो वा स्यात् । अपथं । अपंथाः । तत्पुरुषादि
त्येव । अपथो देशः ॥ ॥ इति समासांताः ॥ शुभमस्तु । श्री ।

क्षेपे यः किम् शब्दस्ततः
परं यत्तदन्तात्समासान्ता
न स्युः । =४ इति ॥

नञस्तत्पुरुषात् । नञ इति प
ष्ठी । नञः संबंधी यस्तत्पुरुषः ।
नञ अवयव कैवकस्तस्मादित्य
र्थः =५
इत्यत्र आमिति प्राग्बहुव्रीहि
ग्रहणं कर्तव्यम् इति वार्ति
को क्ते इति भावः =

क्षेपे किम् किंराजः किंसखः
किंगवः किमत्र प्रश्नो ... षष्ठी
समासः । कर्मधारयो वा ॥ =४

अपथमिति लिङ्गलोपः । अपथं
नपुंसकमिति । नपुंसकत्वम् =२

अविद्यमानः पन्था
यस्मिन्देशे सः =१

अपथं वर्तते इति ॥ मूल ॥
अर्थाभावेऽव्ययीभावः =

हूना समुदायाद ...

उत्तरपदशब्दः समासचरमावयवे रूढः
समासप्रयोजनं ननु स्तोकान्मुक्तस्या पद्मत्वं दूरार्थ=२
स्तोकमुक्तिरित्यादि द्वितीयः
॥ अलुगुत्तरपदे ६।३।१। अलुगधिकारः प्रागानङः। उत्तरपदाधिकारस्त्वापाद
कौ॰ उ॰ १६ समाप्तेः॥ पञ्चम्याः स्तोकादिभ्यः ६।३।२। एभ्यः पञ्चम्या अलुगस्यादुत्तरप
दे। स्तोकान्मुक्तः। एवं अल्पान्तिकार्थकृच्छ्रेभ्यः। उत्तरपदे किं। निः क्रान्तः स्तोकात्
निः स्तोकः॥ ॐ॥ ब्राह्मणाच्छंसिन उपसंख्यानं॥ ॐ॥ ब्राह्मणे विहितानि शस्त्राणि
तानि= स्त्राणि उपचारात्। ब्राह्मणाच्छंसतीति। ब्राह्मणाच्छंसीति ऋत्विक् विशेषः। द्वितीयार्थे पञ्चम्युपसंख्यानादेव॥ ॐ॥ ओजःसहोऽम्भस्तमसस्तृती स=
कर्त्तृकरणे कृतेति समासः इति=
यायाः। ६।३।३। ओजसाकृतमित्यादि। ॐ। अञ्जसउपसंख्यानम्। ॐ।
ऋजोर्भावः
आर्जवं तेन= अञ्जसाकृतं। आर्जवेनकृतमित्यर्थः॥ आत्मनश्च ६।३।६। तृतीयायाः।
आत्मनापंचमइति। तृतीयेति योगविभागात्समासः। इह च प्रकृत्यादित्वात्तृथमार्थे तृतीया।=१
अलुक्। पूरणइति वक्तव्यं। ॐ। पूरणप्रत्ययान्ते उत्तरपदे इत्यर्थः॥
आत्मनापंचमः॥ वैयाकरणाख्यायां चतुर्थ्याः। ६।३।७। आत्मनइत्येव॥
वैयाकरण। व्याकरणे भवा वैयाकरणी ऋगयनादिभ्य इत्यण्
साचासौ वैयाख्या चेति कर्मधारयः। पुंवत्कर्मधारयेति
उभयत्र॥=१॥

१ व ९ स्वयचसामात =१

आत्मनेभाषेति। धातुसूत्रगणोणादिके वाक्यात्सुकंपत्रप्रस्यानेव्या
करणं तत्र धातुपाठे भाषाशब्दस्य दृष्टत्वात् वैयाकरणत्वम्। वैयाकरणाख्यायामित्यत्र औत्तिक स्यसेवात्मन
इत्यस्यानुवर्तेरभ्येत्याशयेनाह। आत्मन इत्येवेति प्रकृतिविकृतिभावाभावेन चतुर्थीसमासाभावेन आपूर्वक्याह। =
योगविभागादिति। =१

आत्मनेपदं। आत्मनेभाषा। तादर्थ्ये चतुर्थ्या एषा चतुर्थीति योगवि
भागात्समासः॥ परस्य च ६।३।८। परस्मैपदं। परस्मैभाषा। हल
दन्तेति ङेरलुक्। त्वचिसारः॥ गवियुधिभ्यां स्थिरः। ८।३।९५।
आभ्यां स्थिरस्य सस्य षः स्यात्। गविष्ठिरः। युधिष्ठिरः। अरस्ये
तिलकः। संज्ञायामिति समासः। हृद्द्युभ्यां च। ९। हृदिस्पृक्।
दिविस्पृक्। मध्याद्गुरौ। ६।३।११। मध्येगुरुः। अन्ताच्च। ०। अन्ते
गुरुः। अमूर्धमस्तकात्स्वाङ्गादकामे। ६।३।१२। कण्ठेकालः। उरसि
लोमः। अमूर्धमस्तकात् किं। मूर्धशिखः। मस्तकशिखः। अकामे किं।

हृदिस्पृगिति। हृदयं च दिवं च स्पृशतीति विग्रहः। अलुग्विधिसामर्थ्यात्कर्मणि सप्तमी कर्मत्वेऽधिकरणत्वविवक्षायां वा॥ =५ अन्तेगुरुरीत्यस्य =७

संज्ञायाम् २।१।४४। सप्तम्यन्तं सुपा
स्वत् संज्ञायाम् स च तत्पुरुषः। वाक्येन
संज्ञानवगमाद् नित्यसमासोऽयम्॥=
अत्र गवीति वचनादेवालुक्। =
गवीत्यत्रादितः पूर्वं लुक्। प्राप्तो हल
न्तत्वाभावेन हलदन्तादित्यस्याप्राप्ते
रतआह हे गवीति वैवचनादेवेति॥ =

मध्येगुरुरीत्यस्य =६

कौ॰ कु॰
७

मुखकामः॥ तत्पुरुषे कृति बहुलं। ६।३।१४। स्तंबेरमः। स्तंबरमः। क
र्णेजपः। कर्णजपः। कचित्र। कुरुचरः। शय्यवासवासिष्वकाला
त्। ६।३।१८। वाऽलुक्। खेशयः। खशयः। ग्रामेवासः। ग्रामवासः।
ग्रामेवासी। ग्रामवासी। हलदन्तादित्येव नेह। भूमिशयः। अ
कालात्किं। पूर्वाह्णशयः। षष्ठ्या आक्रोशे ६।३।२१। चौरस्य
कुलं। आक्रोशे किं। ब्राह्मणकुलं। वाग्दिक्पश्यद्भ्यो युक्तिदंडहर
रेषु। वाचोयुक्तिः। दिशोदंडः। पश्यतोहरः। आमुष्यायणा
ऽऽमुष्यपुत्रिकाऽऽमुष्यकुलिकेति च॥ देवानांप्रिय इति च मूर्खे॥

अमुष्यापत्यम्। आमुष्यायणः। नडादित्वात्फक्। अमुष्यपुत्रस्य भाव आमुष्यपुत्रिका। मनोज्ञादि वुञ्। एवमामुष्यकुलिका॥ =१॥

पश्यतोहर इति। पश्यन्तमनादृत्य हरतीत्यर्थः। षष्ठी चानादर इति षष्ठी॥ =२

देवानांप्रिय इति। यज्ञादिभिर्हि देवानां प्रीतिं जनयन्ति इति प्रियास्तथा च तत्प्रियत्वेन पशुभिस्तुल्यता प्रतीयते इति पशुवन्मूर्ख इति इत्यर्थः =१

शिव॰
७

शुनइव शेफ मस्य शुनःशेफः एवं पुछलां
गूलाभ्यामपि वैवकृत्रीहिः । एतेचवहुच
त्रसिद्धाऋषिभेदाः =॥=१

अन्यत्रदेव श्रियः ॥ शेफ पुछ लांगूले शुमुनः ॥ शुनःशेफः ।
शुनःपुछः । शुनोलांगूलः ॥ दिवसश्च दासे ॥ दिवोदासः । पुत्रेऽ
न्यतरस्यांम् ६।३।२२। षष्ठ्याः पुत्रे परेऽलुग्वा निंदायां । दास्याः
पुत्रः । दासीपुत्रः । निंदायां किं । ब्राह्मणीपुत्रः । ऋतो विद्यायोनि
संबंधेभ्यः ६।३।२३ विद्यासंबंधयोनिसम्बन्धवाचिनऋद
न्तात्षष्ठ्याअलुक् । होतुरंतेवासी । होतुः पुत्रः । पितुरंतेवा
सी । पितुःपुत्रः । विभाषास्वसृपत्योः ६।३।२४ । ऋदंतात्ष
ष्ठ्याः अलुग्वा स्वसृपत्योः परयोः ॥ ननंदति । ननन्दा । ननंदुः
पतिः । मातुः पितुर्भ्यामन्यतरस्याम् ८।३।८५।अभ्यांस्वसुःसस्य

पितुःपुत्रः षष्ठ्यातात्
पितुरुत्पन्न इत्यर्थः =३

कौ॰ पु॰
१८

18

षः वासमासे। मातुःष्वसा। मातुःस्वसा। पितुःष्वसा। पितुःस्वसा। लुक्
वदेतु॥ मातृपितृभ्यांस्वसा।८।३।८४। आभ्यांपरस्यस्वसृसस्यषःसः
मासे। मातृष्वसा। पितृष्वसा। असमासे तु। मातुःस्वसा। पितुःस्वसा॥
॥ ॐ॥ इत्यलुक्समासः॥ ॐ॥ घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु
ङ्योनेकाचोह्रस्वः।६।३।४३। भाषितपुंस्काद्यो ङी तदंतस्यानेका
चो ह्रस्वः घरूपकल्पप्रत्ययेषु परेषु चेलडादिषूत्तरपदेषु॥ त
रप्तमपौघः॥ एतौ घसंज्ञौ स्तः॥ ब्राह्मणितरा। ब्राह्मणितमा। ब्राह्म
णिरूपा। ब्राह्मणिकल्पा। ब्राह्मणिचेली। ब्राह्मणिब्रुवा। ब्राह्मणि
गोत्रा। ब्रूञः पचाद्यच् विवच्यादेशगुणयोरभावोपि निपात्यते॥

उत्तरपदाधिकारे क्वचित्प्रत्ययग्रहणे तदन्तग्रहणं नास्तीत्याशयेनाह। प्रत्यये षिति॥ =६

प्रशंसायां रूपप्=२

मातुः पितुर्भ्यामिति सूत्रे समास इत्यनुवर्तितं तत्फलमाह। असमासे त्विति। =३

ड्यो=

ब्राह्मणितरेति जातिपरङीन् प्रत्ययान्तत्वेन अजातेरिति निषेधात्, तसिलादि ष्विति पुंवद्भावोनेतिबोध्यम्॥ =३

चिलवचने चेलडिति पचादौ इत्यच्यते इति भावः। इत्वात् इदुति ङीष् =॥=२

शिव॰
१८

चेलड्डादीनिरन्तिविषये कुत्सनवाचीति। तैः कुत्सितानि कुत्स
नै रितिसमासः। ङ्याः किंदन्तातरा। भाषितपुंस्कात्किं। ग्रामलकी
तरा। कुवलीतरा। इत्यादि। नद्याः शेषस्यान्यतरस्याम्। ६।३।४४।
अङ्यंतनद्यंताः ङ्यंतैकाचश्च घाद्यादिषु ह्रस्वोवा। ब्रह्मबंधूतरा। ब्र
ह्मबंधुतरा। स्त्रीतरा। स्त्रितरा। ङेः कन्नद्यान। ःः। लक्ष्मीतरा। ३
उगितश्च। ६।३।४५। उगितः परायानदी तदंतस्य घाद्यादिषु ह्रस्वो
वास्यात्। विदुषितरा। ह्रस्वाभावे पक्षे तसिलादिष्विति पुंवत्। वि
द्वत्तरा॥ पादस्य पदाज्यातिगोपहतेषु। ६।३।५२। एषूत्तरपदेषु पा
दस्य पद इत्यदन्त आदेशः स्यात्। पादाभ्यामजतीति पदाजिः।

उत्तरस्वगे पदन्तहलादगे पदेत्यदंतं लुप्त
विभक्तिकमित्याशये नाहादन्त आदेश इति॥=१

नद्याः। उक्तादन्यः शेषः स च ङि
घेत्याह। अङ्यन्तेउपलक्षम
तत्। भाषितपुंस्कत्वापि नेह
सम्बध्यते इत्याशयेनाह।
स्त्रितरेति=३

ग्रामलकी कुवली शब्दौ नदोन्ति
त्यस्त्री लिङ्गौ॥=२

विदुषितरेति। उगितश्चेति ङीपि
वहोः सम्प्रसारणम्॥

य़=२

अजेर्व्यीभावो निपातनात्। =

वादाभ्यामततीति। वदातिः। अज्यातिभ्यां पादे चेतीण्प्रत्ययः। वदगः।

कौ॰ (कु॰ १९) व= वदोऽहतः। वयत्य तदर्थे। ६।३।५३। पादस्य वद तदर्थे ऽति। पादौ वि
ध्यंतीति वयाः शर्कराः। विध्यत्य धनुषेतियत्। अतदर्थे किं। पा
दार्थमुदकं पाद्यं। पादार्घाभ्यां चेतियत्॥ उदकस्योदः संज्ञायाम्।

उदमेघइति। साहस्या त्तुरुष स्यायं संज्ञा। = उदकस्यासो मेघः = ५ ६।३।५७॥ उदमेघः॥ उत्तरपदस्य चेति वक्तव्यं॥ ॐ। ६ क्षीरोदः॥

क्षीरं उदकं यस्येति विग्रहः। = ५५

पेषंवासवाहनधिषु च। ६।३।५८॥ उदपेषं पिनष्टि। उदवासः।

उदकं धीयतेऽस्मिन्निति विग्रहः। कर्मण्यधिकरणे चेति किः प्रत्ययः॥ समुद्रे तु पूर्वेणहि द्रुम्॥ =७ उदवाहनः। उदधिर्घटः॥ एकहलादौ पूरयितव्येऽन्यतरस्यां। ६।३।५९।

एकहलादावित्यत्र एकशब्दोऽसहायवाची एकसंख्यावाचीच सहायश्चतुस्य जाती यो हलवयव श्चिकुयते तया चे कहलमुच्चार्य्यते यत्र अजुच्चार्य्यते तत्रै वास्य प्रवृत्तिरिति भावः। पूरयित व्यं पूरणार्हम्॥ = ६।७

उदकुंभः। उदककुंभः। एकेति किं। उदकस्थाली। पूरयितव्ये किं। उद
कपर्वतः॥ मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहेषु च। ६।३।६०॥

शिव॰ १९

उदमंथ इति। द्रवद्रव्यसंस्कृताः सक्तवो मन्थ इत्युच्यते। मनो०१
उदकेन मन्थ इति विग्रहे तृतीयेति योगविभागात्समासः॥=१

उदमंथः। उदकमंथः। उदौदनः। उदकौदनः॥ इको ह्रस्वोऽङ्यो गाल
वस्य। ६।३।६१। इगंतस्याङ्यंतस्य ह्रस्वो वा उत्तरपदे परे। ग्रामणिपुत्रः।
ग्रामणीपुत्रः। इकः किं रमापतिः। अङ्यः किं। गौरीपतिः॥ ष्यङः
संप्रसारणं पुत्रपत्योस्तत्पुरुषे। ६।१।१३। ष्यङंतस्य पूर्वपदस्य संप्रसा
रणं पुत्रपत्योः परतः॥ संप्रसारणस्य। ६।३।१३९। संप्रसारणस्य दी
र्घः स्यात् उत्तरपदे परे॥ कौमुदगंध्यायाः पुत्रः कौमुदगंधीपुत्रः। कौ
मुदगंधीपतिः॥ इष्टकेषीकामालानां चिततूलभारिषु। ६।३।६५।
इष्टकादीनां तदंतानां च पूर्वपदानां चितादिषु क्रमादुत्तरपदेषु ह्र
स्वः स्यात्। इष्टकचितं। पक्वेष्टकचितं। इषीकतूलं। मुंजेषीकतूलं।

संप्रसारणस्येत्यग ढ्लोपइत्यतो दीर्घ इत्यनुवर्तते। उत्तरपदे इत्यधिकाराल्लब्धम्॥=५

उत्तरपदाक्षिप्तं पूर्वपदं विशेष्यीकृत्य तदन्तविधिरित्याशयेनाह। तदन्तानामिति॥=२ नां=

ष्यङः। इह तत्पुरुषपदेन पूर्वपदमुत्तरपदं चाक्षिप्यते। तत्र ष्यङः पूर्वपदस्य विशेषणत्वात्तदंतग्रहणमित्याह ष्यङन्तस्येति। पुत्रपत्योरुत्तरपदयोरिति पुत्रपत्यन्तयोरिति व्याख्याने तु कारीषगंध्यापरमपुत्र इत्यत्रापि प्रसंगः स्यादिति भावः=३

पक्वेष्टकचितमिति। पदाधिकारात् तदन्तविधिः प्रवर्तत इति भावः।=१

इष्टकचितमिति कर्तृकरणे कृतेति तृतीयासमासः=१

कौमुदगंध्या इति। कुमुदगन्धेरपत्यं स्त्री कौमुदगंध्या तस्या अपत्यमित्यणि कृते। अणिञोरिति ष्यङादेशः। यङश्चाप्। ननु कौमुदगंधीपुत्र इत्यादौ इको ह्रस्वोऽङ्यो गालवस्येति ह्रस्वेन भाव्यं दीर्घविधानं तु व्यर्थमित्यत आह व्यवस्थितविषयेति॥=४

मालाविभक्तीत्यर्थः सुप्यजाता विति शिनिः स्वर्गसूत्रे हारिष्वित क्वचित्पाठः ॥ = १

समानं ज्योतिरस्येति बहुव्रीहिः समानशब्दः समकालवचनः। यस्मिन् ज्योतिषि सूर्यादित्येन नक्षत्रे वा उत्पन्नं वसितं तदहमनपर्यीन्तं मनवर्तमान मशौचादि सज्योतिरित्युच्यते ॥ = ३

मालभारी। उत्पलमालभारी ॥ ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्था

कौ० टु० २०

नवर्णवयोवचनबंधुषु। ६।३।८५॥ एषु द्वादशसूत्तरपदेषु समानस्य सः।

सजनपदः

सज्योतिरित्यादि। तीर्थेये। ६।३।८७। तीर्थ उत्तरपदे यादौ प्रत्यये विव

२०

सोदर सहोदर शब्दौ तु समानमुदरं यस्येति विग्रहे सहशब्दे न समासे कृते वोपसर्जनस्येत्यनेन समावान् सिद्धौ ॥ = ५

क्षिते समानस्य सः। सतीर्थ्यः। एकगुरुकः॥ समानतीर्थवासीति यत्प्र

त्ययः॥ विभाषोदरे। ६।३।८८॥ यादौ प्रत्यये विवक्षिते इत्येव॥ सो

दर्यः। समानोदर्यः। दृग्दृशवतुषु। ६।३।८९। सदृक्। सदृशः॥ बतुरुत्तरार्थः = ६

दृक्षे चेति वक्तव्यम्॥ सदृक्षः॥ इदंकिमोरीश्की। ६।३।९०। दृग्दृ

इदमईश् किमः की स्यात् = २

शवतुषु। ईदृक्। ईदृशः। कीदृक्। कीदृशः। दृक्षे च। ईदृक्षः।

कीदृक्षः॥ अथ षष्ठ्यास्तृतीयास्यस्याऽन्यस्य दुगाशीराशास्थास्थित

शिक्ष २०

अषष्ठ्यां अन्यदाशीरित्यादयः कर्मधारयाः
नायं निषेधः इति च एतत् अषष्ठीत्यतीयास्थ
स्येत्येव सिद्धे निषेधाज्ञ त्यत्वज्ञापनात् क्विन्नेञ्
उपादानाल्लभ्यते इत्याहुः ॥ =२

तोत्सुकोतिकारकरागच्छेषु ।६।३।९९। अन्यशब्दस्य दुगागमः स्यादाशी
रादिषु परेषु । अन्यदाशीः । अन्यदाशा । अन्यदास्था ॥ अन्यदास्थितः ।
अन्यदुत्सुकः । अन्यदूतिः । अन्यद्रागः । अन्यदीयः । अषष्ठीत्या
दि किं । अन्यस्यान्येन वा आशीः । अन्याशीः ॥ कारके छे च नायं नि
षेधः । अन्यस्य कारकोऽन्यत्कारकः । अन्यस्यान्येन वायमन्यदीयः ।
गहादेराकृतिगणत्वाच्छः ॥ अर्थे विभाषा ।६।३।१००। अन्यदर्थः ।
अन्यार्थः ॥ कोः कत्तत्पुरुषेऽचि ।६।३।१०१। अजादौ उत्तरपदे । कुत्सि
तोऽश्वः । कदश्वः । कदन्नं । तत्पुरुषे किं । कूष्ट्रो राजा । त्रौ च ॥ कत्त्रयः । कुत्सितास्त्रयः =२
॥रथवदयोश्च ।६।३।१०२। कद्रथः । कद्वदः ॥ तृणे च जातौ ।६।३।१०३।

पृषोदर । पृषोत्थान । वलाहक । जीमूत । श्मशान । उलूखल । पिशाच । वृषी मयूर । पृषोदरादिराकृतिगणः । एतच्च समासविषयकमेवेति नियमेन प्राचीनकारिकायां हंससिंहादिशब्दानामपि पृषोदरादित्वात् सिद्धत्वोक्त ॥ =

कापथमिति । कुत्सितः पन्थाः । ऋक्पूरब्धूरिति समासान्तः । पथः संख्याव्ययादेरिति नपुंसकत्वं ॥ =१

कादिति । अक्षशब्देन तत्पुरुषः । अक्षिशब्देन बहुव्रीहिर्वा ॥ =१

कौ. पु. २१ ईषज्जलं =

कत्तृणं ॥ का पथ्यक्षयोः । ६।३।१०४। कापथं । काक्षः । ईषदर्थे । ६।३।१०५।
काजलं । विभाषा पुरुषे । ६।३।१०६। कापुरुषः । कुपुरुषः । कवं चोष्णे । ६।३।१०७।
उष्णशब्दे उत्तरपदे कवं चास्यात् । चात्का । कवोष्णं । कोष्णं । कदुष्णं ।
(प्रकारभेद सादृश्ये =)
पृषोदरादीनि यथोपदिष्टम् । ६।३।१०९। पृषोदरप्रकाराणि शिष्टैर्य
(जलबिंदु ॥)
थोच्चारितानि तथैव साधूनि स्युः ॥ पृषत् उदरं । पृषोदरं । तलोपः ।
वारिवाहको बलाहकः । पूर्वपदस्य बः । उत्तरपदादेश्च लत्वं । भ
वेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् गूढोत्मा वर्णविकृतेर्वर्ण
नाशात्पृषोदरं ॥१॥ मतौ बह्वचोऽनजिरादीनां । ६।३।११९। दीर्घः ।
अमरावती । अनजिरादीनां किं । अजिरवती । संज्ञायामित्येव ।

21

हिनस्तीति सिंह ॥ हसतीति हंसः = ।

हन्तेः पचाद्यच् इति सगागमे हंस इति हिंसेस्तु पचाद्यचि हकारसकारयोः स्थानव्यत्ययात् सिंह इति गूढोत्मेत्यत्र आकारविकृत्या उकारादेशः । पृषोदरमित्यत्र तकारवर्णलोपः । इत्येवं रीत्या सर्वत्र बोध्यम् ॥ = ३।२ =

पृषोदरप्रकाराणीति । आदिशब्दो हि न्यूनस्यावचनः पृषोदरादिष्वपदानर्थक्यादिति भावः । शिष्टैरिति अध्याहार लभ्यमिदं यथोपदिष्टमित्यत्र यथार्थेऽव्ययीभावः । उपदिष्टशब्दो उच्चारणक्रियः । याभिः शिष्टैरुपदिनीत्यर्थः । एवं स्थिते फलितमाह । यथोच्चारितानि तथैवेति । =४

अमरावतीति । मादुपधायाश्च मतोर्वोऽयवादिभ्यः । इति मतोर्मस्य वः ॥ =१

शिव. २१

घञ्मात्रस्योत्तरपदत्वासं
भवान्नेह । घञन्त इति । नि
षाद इति पुलिन्दो मनुष्य
जातिः । निषीदत्यस्मिन्पा
पमिति निषादः हलश्चेत्य
धिकरणे घञ् ।=३

नेह । वलयवती । शरादीनां च ।६।३।१२०। शरावती । वले ६।३।११८ ।
वलच्प्रत्यये पूर्वस्य दीर्घः स्यात् संज्ञायाम् । कृषीवलः । उपसर्गस्य घ
ञ्यमनुष्ये बहुलम् ।६।३।१२२। उपसर्गस्य बहुलं दीर्घः घञन्ते उत्तरप
दे न तु मनुष्ये । परिपाकः । परीपाकः । अमनुष्ये किं । निषादः । न
रे संज्ञायाम् ।६।३।१२९। विश्वानरः । मित्रे चर्षौ ।६।३।१३०। विश्वा
मित्रः । शुनो दंत दंष्ट्रा कर्ण कुंद वराह पुच्छ पदेषु दीर्घो वाच्यः । ॐ ।
श्वादंतः इत्यादि ॥ प्रनिरंतःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयू
क्षाभ्योऽसंज्ञायामपि ।८।४।५। एभ्यो वनस्य णत्वं । प्रवणं । कार्ष्यव
णम् । इह षात्परत्वात् णत्वम् । एभ्यो वनस्य । विभाषौषधिवन

रजःकृष्यासुतिपरिषदो वलच् । इति मत्वर्थे वलच् ।=

दंष्ट्रेति केवार्त्तिके दीर्घान्तः
पठ्यते केचित्तु ह्रस्वान्तं पठित्वा
श्वादंष्ट्र इति बहुव्रीहौ दीर्घमा
हुर्न तत्पुरुषे इह षादिति कार्ष्ये
श्येति तालव्यपाठस्तु नादर्थ इति
भावः ॥=

वन

वनस्पतिशब्दः वृक्षमात्रवाची नतु पारिभाषिक पुष्पशून्यफलवद्वृक्षमात्रपरस्तदुदाहरणेनाह शिरीषवनमिति ॥=२

कौ. ५.
२२
ओषधित्वात् प्राप्तौ वनस्पतिनिषेधः। इरिका मिरिका तिमिरा। इरिकादिराकृतिगणः ॥=

22

स्पतिभ्यः। ८।४।६। एभ्यो वनस्य णत्वं वा स्यात्॥ दूर्वावणं। दूर्वावनं।
शिरीषवनं। शिरीषवणं। द्व्यच् त्र्यच्भ्यामेव। नेह। देवदारुवनं।
इरिकादिभ्यो न। इरिकावनं। कि मिरिकावनं। वाहनमाहितात्।
८।४।८। आरोप्य यदुह्यते तद्वाचि पूर्वपदस्थान्निमित्तात्परस्य वाह
ननस्य णः। इक्षुवाहणं। आहितात् किं। इन्द्रवाहनम्। इन्द्रस्वामिकं
वाहनमित्यर्थः। वहतेर्ल्युटि वृद्धिरिहैव सूत्रे निपातनात्। पानं देशे।
८।४।९। पूर्वपदस्थान्निमित्तात्पानस्य णः देशे गम्ये। क्षीरं पानं
येषां ते क्षीरपाणाः उशीनराः। सुरापाणाः प्राच्याः॥ वा भावक
रणयोः। ८।४।१०। पानस्येत्येव। क्षीरपाणं। क्षीरपानं। प्रातिप

द्व्यच् त्र्यच्भ्यामिति व्यवस्थित विभाषा त्र्यच् णादिति भावः =२

पीयते इति पानम् कर्मणि ल्युट्

क्षीरपाणमिति। पीतिः पानं। ल्युट् चेति। नपुंसके भावे ल्युट्। पीयतेऽनेनेति पानं करणे ल्युट् क्षीरस्य पानं क्षीरपाणम् ॥=१

उशीनरशब्दो देशवाची तद्वासिषूपचारात् वर्तते ॥=२

शिव.
२२

दिकांतनुम्विभक्तिषु च । ८।४।११। पूर्वपदस्थान्निमित्तात्परस्य
एषु स्थितस्य नस्य णो वा प्रातिपदिकान्ते । माषवापिणौ । नुमि ।
व्रीहिवापाणि । विभक्तौ । माषवापेण । पदे माषवापिनावित्या
दि । कुमति च । ८।४।१३। कवर्गवत्युत्तरपदे प्राग्वत् । हरिका
मिणौ । हरिकामाणि । हरिकामेण । पदव्यवायेऽपि । ८।४।३८।
पदेनव्यवधानेऽपि णत्वं न । माषकुंभवापेन । अतद्धित इति वा
च्यं । ःः । आर्द्रगोमयेण । शुष्कगोमयेण । पारस्करप्रभृतीनि
च संज्ञायां । ६।१।१५७। एतानि ससुट्कानि निपात्यन्ते । पारस्करः ।
किष्किंधा ॥ तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च । त्यर्थः = ४

पदेनव्यवधानऽपीति । निमित्तनिमित्तिनोर्मध्ये पदेनव्यवधान इत्यर्थः । व्यवधायकपदं च णत्वाश्रयातिरिक्तं भिन्नपदत्वेन विशेषणीयमिति भावः ॥ = ६

किष्किन्धेति । किम् इति पिधत्ते इति विग्रहे । आतोनुपसर्गे कः । टाप् । निपातनात् किमो द्वित्वं पूर्वस्य मलोपः सुट् षत्वं च किं किं दधातीति विग्रहे तु मतेऽपि सायां द्वित्वम् सिद्धम् । अन्यगतु निपातनादेव वस्तुतस्तु रूढिशब्दा एते ॥ = ॥ ९ =

माषवापिणाविति । बहुलमाभीक्ष्ण्ये इति णिनिः = २

व्रीहिवापाणीति कर्मण्यण् = ३

कुमति च । अनेकाजुत्तरपदार्थ आरम्भः कादित्येव नस्य ... त्यस्मिन्विधिरिति तदादिविधौ कवर्गाद्युत्तरपद एव हरिकामिणावित्यादावयं विधिः स्यात्तत्तु वस्त्रयुगेणेत्यादौ तथा चेमतुर्वंत निर्देश आवश्यकः इत्याह कवर्गवतीति ॥ = ४

आर्द्रगोमयेणेति । इह गोशब्दवदुत्तरपदत्वेचेत्तिनिषेधो न शंक्यः गोमयशब्दस्योत्तरपदत्वात् गोशब्दस्य च सादिविपत्तिपदत्वात् ॥ = ३

माषकुंभवापेनेति माषकुंभं वपतीति कर्मण्यण् ७ वपदसमासः माषकुंभवापेनेत्यग कुंभस्य वापः कुंभवापः कुम्भशब्दः कुंभपरिमिते धान्ये भावे क्तः माषाणां कुंभवाप इति विग्रहे तत्र मिति ॥ = ६

अतद्धित इति । व्यवधायकस्य णत्वाश्रयातिरिक्त तद्धिते भिन्नपदत्वे निषेध इत्यर्थः = ४

तद्बृहतोरिति निगमसूत्रमेतत् ॥ = २

पारस्कर इति । पारं करोतीति विग्रहः । कृञो हेतु ताच्छील्येत्यादिना टः । पारस्करो देशो नगरं वा । पारस्करो देशः । वस्तुव्यतिकर्ता । रथस्यानदी । किष्कुः प्रमाणं । किष्किन्धा गुहा । तस्करश्चोरः । बृहस्पतिः सुरपतिर्देवः । पारस्करादिराकृतिगणोऽयम् ॥ = २

तात्पूर्वं चर्वेन दकारो पि वोध्यः। तद्बृहतो दकारतकारौ लुप्येते।
करपत्योस्तु स्तुट् चौर देवतयोः इति समुदायोपाधिः। तस्करः।
बृहस्पतिः॥ प्रायस्य चित्ति चित्तयोः॥ प्रायश्चित्तिः। प्रायश्चि
त्तं। वनस्पतिरित्यादि॥ ॐ। आकृतिगणोयम्॥ इति स
मासाश्रय विधिः। समाप्तम्। शुभम्। श्रीशारदायै नमः॥

प्रायस्चित्ति गणसूत्रमेतद पि। प्राय इत्यकारान्तमु लिङ्गं तपोवाची। प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते इति स्मृतेः =३

बृहत्या वाचः पतिः बृहस्पतिः। वाग्वै बृहती तस्या एव पतिरिति स्मृतेः =३

Complete